॥ श्रीः ॥

# संस्कृतभाषादीपिका

## द्वितीया

श्रीसुरसरस्वतीसभा

शृङ्गगिरिः

१९९३

॥ श्रीः ॥

# संस्कृतभाषादीपिका

## द्वितीया

श्रीसुरसरस्वतीसभा
शृङ्गगिरिः

१९९३

ಬೆಲೆ : ರೂ. 7–00

ಪರಿಷ್ಕೃತಸಂಸ್ಕರಣ : 1993

ಪ್ರತಿಗಳು : 5000

पुरे ग्रामे गृहे कुट्यां
बालो वृद्धो युवापि वा।
करोतु संस्कृताभ्यासं
प्राप्नोतु ज्ञानसंपदम्॥

ಈ ಪುಸ್ತಕವು ದೊರೆಯುವ ಸ್ಥಳ

**ಶ್ರೀಸುರಸರಸ್ವತಿಸಭಾ (ರಿ.) ಶೃಂಗೇರಿ**

"ಶ್ರೀ ವಿದ್ಯಾತೀರ್ಥ ಕೃಪಾ"

ಶ್ರೀ ಶಂಕರಮಠದ ಆವರಣ

ಶಂಕರಪುರಂ

ಬೆಂಗಳೂರು – 560 004

# ಮುನ್ನುಡಿ

ನಮ್ಮ ದೇಶಭಾಷೆಗಳಿಗೆಲ್ಲ ಮೂಲವೂ, ಆದ್ದರಿಂದಲೇ ಶ್ರೇಷ್ಠವೂ ಆದ ಸಂಸ್ಕೃತಭಾಷೆಯನ್ನು ಎಲ್ಲರೂ ಕಲಿಯಬೇಕೆಂಬುದು ಶ್ರೀ ಶ್ರೀ ಶೃಂಗೇರಿ ಜಗದ್ಗುರು ಮಹಾಸನ್ನಿಧಾನಂಗಳವರ ಆಶಯವಾಗಿ, ಈ ಉದ್ದೇಶದಿಂದ ಅವರು "ಶ್ರೀಸುರಸರಸ್ವತೀಸಭಾ" ಎಂಬ ಸಂಸ್ಥೆಯನ್ನು ಸ್ಥಾಪಿಸಿ ಪೋಷಿಸುತ್ತಿದ್ದು. ಈಗಿನ ಶ್ರೀ ಶ್ರೀ ಜಗದ್ಗುರು ಸನ್ನಿಧಾನಂಗಳವರೂ ಸಹ ಪೋಷಿಸುತ್ತಿದ್ದಾರೆ. ಈ ಸಭೆಯು ಸಂಸ್ಕೃತ ಭಾಷೆಯ ಪ್ರಸಾರಕ್ಕಾಗಿ ತನ್ನದೇ ಆದ ಪರೀಕ್ಷೆಗಳನ್ನು ಏರ್ಪಡಿಸಿ ನಡೆಸುತ್ತಾ ಬಂದಿದೆ. ಈ ಪರೀಕ್ಷೆಗಳು ಅತ್ಯಂತ ಜನಪ್ರಿಯವಾಗುತ್ತಿರುವುದನ್ನು ಗಮನಿಸಿ, ಇವುಗಳ ಪ್ರಗತಿಗಾಗಿ ಶ್ರೀ ಶ್ರೀ ಸನ್ನಿಧಾನಂಗಳವರು ಕೆಳಗೆ ಕಂಡ ವಿದ್ವಾಂಸರನ್ನೊಳಗೊಂಡ ಒಂದು ಪಠ್ಯಪುಸ್ತಕ ಸಮಿತಿಯನ್ನು ನೇಮಿಸಿರುತ್ತಾರೆ.

| | | |
|---|---|---|
| 1. | ವಿದ್ವಾನ್ ಎನ್. ರಂಗನಾಥಶರ್ಮಾ | ಅಧ್ಯಕ್ಷರು |
| 2. | ವಿದ್ವಾನ್ ಎಸ್. ವಿ. ಶಾಮಭಟ್ಟ | ಸದಸ್ಯರು |
| 3. | ವಿದ್ವಾನ್ ಶ್ರೀಧರ ಹೆಗಡೆ, ಎಂ.ಎ., ಬಿ.ಇಡಿ., | ಸದಸ್ಯರು |
| 4. | ವಿದ್ವಾನ್ ಶಂಕರಭಟ್ಟ, ಎಂ.ಎ., ಬಿ.ಇಡಿ., | ಸದಸ್ಯರು |
| 5. | ವಿದ್ವಾನ್ ಎಸ್. ಪ್ರಭಾಕರಶರ್ಮಾ, ಎಂ.ಎ., ಬಿ.ಇಡಿ, | ಸದಸ್ಯರು |
| 6. | ವಿದ್ವಾನ್ ಎಂ. ಆರ್. ವೆಂಕಟೇಶಮೂರ್ತಿ | ಸದಸ್ಯರು |

ಈ ಸಮಿತಿಯವರು ಅತ್ಯಂತ ಶ್ರದ್ಧೆಯಿಂದ ಶ್ರಮವಹಿಸಿ, ಈ ಪುಸ್ತಕವನ್ನು ಪರಿಷ್ಕಾರಮಾಡಿ ಸಿದ್ಧಪಡಿಸಿಕೊಟ್ಟಿದ್ದಾರೆ. ಈ ಎಲ್ಲ ವಿದ್ವಾಂಸರಿಗೂ, ಈ ಗ್ರಂಥವನ್ನು ಅಂದವಾಗಿ ಸಕಾಲಕ್ಕೆ ಮುದ್ರಣಮಾಡಿಕೊಟ್ಟಿರುವ ಶ್ರೀ ಡಿ. ಎಸ್. ಕೃಷ್ಣಾಚಾರ್, ಪ್ರಭಾ ಮುದ್ರಣಾಲಯ, ಬೆಂಗಳೂರು – 560 004, ಅವರಿಗೂ ಕೃತಜ್ಞತಾಪೂರ್ವಕವಾದ ಧನ್ಯವಾದಗಳನ್ನು ಅರ್ಪಿಸುತ್ತೇನೆ.

ಬೆಂಗಳೂರು
ಶ್ರೀಮುಖನಾಮ ಸಂವತ್ಸರ
ಆಶ್ವಯುಜ ಶು. ಪಂಚಮೀ
20–10–1993

**ಬಿ. ಎನ್. ವಿ. ಸುಬ್ರಹ್ಮಣ್ಯಂ**
ಅಧ್ಯಕ್ಷರು
ಶ್ರೀಸುರಸರಸ್ವತೀಸಭಾ

# ವಿಷಯಾನುಕ್ರಮಣಿಕೆ


| पाठः | | पुटम् |
|---|---|---|
| १. | श्रीहरिः | 5 |
| २. | दिवाकरः | 8 |
| ३. | इन्दुः | 11 |
| ४. | गौः | 14 |
| ५. | सम्भाषणम् | 17 |
| ६. | श्रीकृष्णस्य उपदेशः | 21 |
| ७. | पार्वती परमेश्वरं वक्रभणित्या पराजयते | 26 |
| ८. | सञ्जीवी मानवः | 30 |
| ९. | छान्दसानां कविता | 34 |
| १०. | चक्रव्यूहभेदः | 38 |
| ११. | कृपणस्य धनम् | 41 |
| १२. | न स्वभावः परिवर्तते (कण्ठपाठः करणीयः) | 44 |
| १३. | सुभाषितानि | 47 |
| १४. | मारुतेः वाक्कौशलम् | 51 |
| १५. | लोकोक्तयः (कण्ठपाठः करणीयः) | 55 |
| १६. | व्याकरणविभागः | 56 |
| | सन्धिः | |
| | उपसर्गः | |
| | कृदन्ताव्ययम् | |
| | क्रियारूपाणि | |
| | शब्दरूपाणि | |
| १७. | षष्ठिसंवत्सराः (कण्ठपाठः करणीयः) | 70 |
| १८. | मार्गदर्शिनी प्रश्नपत्रिका उत्तरलेखनक्रमश्च । | 71 |

### प्रथमः पाठः

# श्रीहरिः

हरिः लोकं रक्षति। हरिं विना अन्यः रक्षकः नास्ति। भक्ताः हरिं भक्त्या पूजयन्ति। ते हरये कुसुमाञ्जलिं अर्पयन्ति। हरिणा लोकः संरक्ष्यते। अहं हरेः मन्दिरं गच्छामि। हरौ रुष्टे गुरुः त्रायते। अहं हरेः चरणयोः प्रणमामि। हे हरे ! मां रक्ष रक्ष।

अतिथिं देवं भावय। यूयं अतिथीनां सपर्यां कुरुत। कवेः ऋषेः च कार्ये विभिन्ने। कवीनां हृदयं उदधिः इव गभीरम्। अयं स्वप्रतिभया यथा रोचते तथा विश्वं परिवर्तयति। अतः कविः एकः प्रजापतिः। भवभूति-भास-भारवि-कालिदासादयः महाकवयः इति विश्रुताः। तेषु कालिदासः कविकुलगुरुः।

ऋषयः यतयः च आश्रमेषु वसन्ति। ते उग्रं तपः आचरन्ति। ऋषिषु वाल्मीकिः व्यासः च भारतमातुः सुपुत्रौ। वाल्मीकिना श्रीमद्रामायणं विरचितम्। इदमेव आदिकाव्यमिति विख्यातम्। वाल्मीकिः आदिकविः इति विश्रुतः।

भगवान् व्यासः महाभारतस्य निर्माता। अष्टा-दशपुराणानां ब्रह्मसूत्राणां च कर्ता अयमेव। रामायणं

महाभारतं अष्टादश पुराणानि च भारतीयसंस्कृतेः आकराः ग्रन्थाः। नमो वाल्मीकये व्यासाय च ॥

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः।
अफाललोचनः शम्भुः भगवान् बादरायणः ॥

### अभ्यासः

1. संस्कृतभाषया उत्तरं लिखत—

(१) के हरिं पूजयन्ति ? (२) केन लोकः संरक्ष्यते ? (३) त्वं कस्य मन्दिरं गच्छसि ? (४) केषां हृदयं उदधिः इव गभीरम् ? (५) 'कविः एकः प्रजापतिः' कथम् ? (६) विश्रुताः महाकवयः के (७) कविकुलगुरुः कः ? (८) ऋषयः किं कुर्वन्ति ? (९) भारतस्य सुपुत्रौ कौ ?(१०) श्रीमद्रामायणं केन विरचितम् ?(११) महाभारतस्य निर्माता कः ? (१२) भारतीयसंस्कृतेः आकराः ग्रन्थाः के ?

2. अधोलिखितानां पदानां अन्तं, लिङ्गं, वचनं, विभक्तिं च लिखत —

(१) नेत्रे (२) भक्त्या (३) चरणयोः (४) हरौ
(५) वाल्मीकिना (६) आश्रमेषु (७) स्वप्रतिभया (८) पुराणानि
(९) कवेः (१०) तेषु

3. इमानि वाक्यानि पूरयत—

(१) —— लोकः संरक्ष्यते ।

(२) हरये —— अर्पयन्ति ।

(३) —— वाल्मीकये ।

(४) कविः एकः —— ।

(५) कविषु कालिदासः —— ।

(६) वाल्मीकिः —— इति विश्रुतः ।

(७) अतिथिं —— भावय ।

(८) रामायणम् —— इति प्रसिद्धम् ।

**4. पर्यायशब्दान् लिखत –**

(१) सपर्या (२) उदधिः (३) विश्रुतः

(४) पुत्रः (५) वदनम्

**5. सन्धिं विभज्य नाम लिखत –**

(१) कुसुमाञ्जलिम्

(२) कालिदासादयः

**6. एषां रूपाणि पुरुषत्रये लिखत –**

(१) त्रायते (२) वसति

(३) अर्पयति (४) संरक्ष्यते

**7. इतरवचनद्वयं लिखत –**

(१) हरेः (२) माम्

(३) यतिः (४) भक्तः

**8. व्याकरण विशेषं लिखत–**

(१) हरिं विना ।

(२) नमो वाल्मीकये ।

**9. एतानि वाक्येषु योजयत –**

(१) मन्दिरम् (२) विख्यातः

(३) भारतमातुः (४) निर्माता

**10.** एषां शब्दानां निर्दिष्टविभक्तिरूपाणि लिखत :—

(१) यति – तृतीया (२) मुनि – पञ्चमी

(३) रवि – चतुर्थी (४) गिरि – षष्ठी

### ಶಬ್ದಾರ್ಥ

रुष्टे=ಕೋಪಗೊಳ್ಳಲಾಗಿ, भावय=ತಿಳಿ, सपर्या= ಪೂಜೆ, उदधिः इव =ಸಮುದ್ರದಂತೆ, रोचते =ಇಷ್ಟವಾಗುತ್ತದೆ, प्रजापतिः =ಬ್ರಹ್ಮ, उग्रम्= ಕಠಿಣವಾದ, विश्रुतः=ಪ್ರಸಿದ್ಧ, अफाललोचनः= ಹಣೆಯಲ್ಲಿ ಕಣ್ಣುಗಳಿಲ್ಲದ, अचतुर्वदनः= ನಾಲ್ಕು ಮುಖಗಳಿಲ್ಲದ, बादरायणः=ವ್ಯಾಸರು, गभीरम्= ಆಳ, ತಿಳಿಯಲಶಕ್ಯ

---

द्वितीयः पाठः

# दिवाकरः

दिवाकरः प्रभाते उदेति। प्राच्यां अस्य विम्बं आरक्तं भवति। तदानीं तस्य प्रकाशः कोमलः भवति। सः उषःकालः। उषःकाले गृहात् बहिः नद्याः तीरे सन्ध्यां उपासते वैदिकाः। तस्मिन् समये पर्यटनं आरोग्यं जनयति। तदा अन्धकारः नश्यति। सर्वत्र प्रकाशः प्रसरति। सर्वे जन्तवः उत्तिष्ठन्ति। लतासु पादपेषु च कुसुमानि विकसन्ति। पुष्पाणां सौरभं वायुः सर्वत्र सर्वासु

दिशासु प्रसारयति। उदयमानं रविं आस्तिकाः भक्त्या प्रणमन्ति।

क्रमेण रविः अम्बरमध्यं आरोहति। तदा तस्य मरीचयः प्रखराः भवन्ति। क्रमेण सः प्रतीच्यां अवतरति। पुनः तस्य बिम्बं आरक्तं भवति। तदा मयूखाः कोमलाः भवन्ति। तदानीं सर्वे जन्तवः स्वस्वनिवासं प्रतिनिवर्तन्ते, रात्रौ विश्रान्तिसुखं अनुभवन्ति च।

उदये सविता रक्तः रक्तश्चास्तमये तथा।
सम्पत्तौ च विपत्तौ च महतामेकरूपता॥

### अभ्यासः

**1. संस्कृतभाषया उत्तरं लिखत—**

(१) दिवाकरः कदा उदेति? (२) वैदिकाः कदा कुत्र सन्ध्यां उपासते? (३) उषःकाले पर्यटनं किं जनयति? (४) वायुः कं प्रसारयति? (५) रवेः मरीचयः कदा प्रखराः भवन्ति? (६) सूर्यस्य बिम्बं कदा आरक्तं भवति? (७) जन्तवः रात्रौ किं अनुभवन्ति? (८) सविता कदा रक्तः भवति?

**2. अधोलिखितानां पदानां अन्तं, लिङ्गं, वचनं, विभक्तिं च लिखत—**

(१) गृहात् (२) सन्ध्याम् (३) लतासु (४) मरीचयः
(५) सर्वे (६) सम्पत्तौ (७) सविता (८) तस्य
(९) मयूखाः (१०) पादपेषु

3. **इमानि वाक्यानि पूरयत—**

(१) प्राच्यां सूर्यस्य बिम्बं —— भवति ।

(२) लतासु —— च कुसुमानि विकसन्ति ।

(३) सम्पत्तौ विपत्तौ च —— एकरूपता ।

4. **पर्यायशब्दान् लिखत—**

(१) प्रभातकालः (२) वैदिकः

(३) अन्धकारः (४) भानुः

(५) गृहम् (६) जलम्

(७) पादपः (८) वायुः

(९) मरीचिः (१०) पुष्पम्

5. **एषां रूपाणि पुरुषत्रये लिखत—**

(१) नश्यति (२) प्रणमति

(३) निवर्तते (४) अवतरति

6. **इतरवचनद्वयं लिखत —**

(१) नद्याः (२) लतायाम्

(३) जन्तुः (४) सर्वस्याम्

7. **एतानि वाक्ये योजयत —**

(१) बहिः (२) सर्वत्र

(३) कुसुमानि (४) प्रातः काले

8. **इमानि वाक्यानि प्रश्नवाक्यानि कुरुत —**

(१) दिवाकरः प्रतीच्यां अवतरति ।

(२) पुष्पाणां सौरभं वायुः प्रसारयति ।

(३) सर्वे जन्तवः स्वनिवासं प्रतिनिवर्तन्ते ।

(४) उदयमानं रविं आस्तिकाः भक्त्या प्रणमन्ति ।

**ಶಬ್ದಾರ್ಥ**

उषःकालः = ಮುಂಜಾನೆ, बहिः = ಹೊರಗಡೆ, आरक्तं = ನಸುಗೆಂಪು, मरीचिः, मयूखः =ಕಿರಣ.

---

तृतीयः पाठः

# इन्दुः

इन्दुः रात्रौ उदयते। इन्दोः प्रकाशः चन्द्रिका। चन्द्रिकायाः ज्योत्स्ना कौमुदीति अपरे नाम्नी। सा शीतला आह्लादकरी च वर्तते।

सूर्यस्य प्रकाशः स्वकीयः। अत एव सः चण्डरश्मिः। विधोः प्रकाशः परकीयः। अयं रवेः लभते प्रकाशम्। अतः शीतलः। चन्द्रः भूमिं परितः प्रदक्षिणं करोति। एकेन मासेन तत्पूर्णं भवति। पूर्णिमायां चन्द्रस्य बिम्बं पूर्णं भवति। ततः दिने दिने क्षीयते विधुः। तदा कृष्णपक्षः भवति।

चन्द्रस्य षोडशकलाः सन्ति। तस्य कलामेकां धूर्जटिः शीर्षे वहति। अतः सः चन्द्रशेखरः इति प्रथितः। अमावास्यायां चन्द्रस्य न कापि कला दृश्यते गगने। पुनः प्रतिपदमारभ्य क्रमेण सः वर्धते। तदा शुक्लपक्षः भवति।

रात्रेः अमूल्यं आभरणं विधुः। विधोः अमूल्यं आभरणं रात्रिः।

"त्रियामा शशिना भाति शशी भाति त्रियामया"।

सूर्यः चन्द्रः च परमेश्वरस्य द्वे नेत्रे। सः एताभ्यां नेत्राभ्यां जनानां व्यवहारं पश्यति। ये साधु कर्म कुर्वन्ति ते तस्य प्रियाः भवन्ति। तस्य अनुग्रहेण सुखं अनुभवन्ति। ये दुष्टं कर्म कुर्वन्ति ते तस्य कोपस्य पात्राणि भवन्ति। दुःखं अनुभवन्ति च।

### अभ्यासः

1. संस्कृतभाषया उत्तरं लिखत –

(१) इन्दुः कदा उदयते ? (२) चन्द्रिका कीदृशी वर्तते ? (३) कस्य प्रकाशः स्वकीयः ? (४) कस्य प्रकाशः परकीयः ? (५) भूमिं परितः कः प्रदक्षिणं करोति ? (६) चन्द्रस्य बिम्बं कदा पूर्णं भवति ? (७) चन्द्रस्य कति कलाः सन्ति ? (८) धूर्जटिः शीर्षे कां वहति ? (९) चन्द्रस्य कला कदा न दृश्यते ? (१०) रात्रेः अमूल्यं आभरणं किम् ? (११) शशी कया भाति ? (१२) के परमेश्वरस्य प्रियाः भवन्ति ?

2. अधोलिखितानां पदानां अन्तं, लिङ्गं, विभक्तिं वचनं च लिखत—

(१) रात्रौ (२) अपरे (३) विधोः (४) पूर्णिमायाम्
(५) गगने (६) नेत्रे (७) रवेः (८) शशिना
(९) चन्द्रिकायाः (१०) ते

**3. इमानि वाक्यानि पूरयत—**

(१) त्रियामा —— भाति, शशी भाति —— ।

(२) इन्दुः —— लभते प्रकाशम् ।

(३) पूर्णिमायां चन्द्रस्य बिम्बं —— भवति ।

(४) सूर्यः चन्द्रः च —— द्वे नेत्रे ।

**4. पर्यायशब्दान् लिखत—**

(१) इन्दुः (२) रात्रिः (३) चन्द्रिका (४) भूमिः
(५) शीर्षम् (६) नेत्रम् (७) गगनम् (८) कर्म

**5. एषां विरुद्धार्थकपदानि लिखत—**

(१) स्वकीयः (२) प्रकाशः
(३) क्षीयते (४) साधुः

**6. इतरवचनद्वयं लिखत—**

(१) इन्दोः (२) शीर्षे (३) पूर्णिमायाम् (४) सूर्यस्य
(५) शीतला (६) कलाम् (७) गगने (८) ये

**7. व्याकरणविशेषं लिखत—**

(१) गृहात् बहिः । (२) भूमिं परितः ।

**8. एतानि वाक्येषु योजयत—**

(१) कापि (२) परितः (३) अत एव
(४) क्रमेण (५) नेत्राभ्याम्

**9. इमानि वाक्यानि प्रश्नवाक्यानि कुरुत—**

(१) रात्रौ इन्दुः उदयते । (२) विधोः प्रकाशः परकीयः । (३) विधोः अमूल्यं आभरणम् रात्रिः । (४) परमेश्वरः नेत्राभ्यां जनानां व्यवहारं पश्यति ।

**10.** एषां लकारं, पुरुषं, वचनं च लिखत—

(१) उदयते (२) सन्ति

(३) पश्यति (४) लभते

**ಶಬ್ದಾರ್ಥ**

धूर्जटिः=ಪರಮೇಶ್ವರ, प्रथितः=ಪ್ರಸಿದ್ಧ, त्रियामा= ರಾತ್ರಿ, प्रतिपत्= ಪಾಡ್ಯ, स्वकीयः=ತನ್ನದು, रश्मिः= ಕಿರಣ, विधुः=ಚಂದ್ರ, परितः= ಸುತ್ತಲೂ.

---

चतुर्थः पाठः

# गौः

एषा गौः। गोः धेनुः इति नामान्तरं विद्यते। अस्याः चत्वारः पादाः सन्ति। द्वे शृङ्गे वर्तेते। एकं लम्बं पुच्छं च विद्यते। इयं प्रकृत्या आकारेण च परमा साध्वी। अस्याः वत्सः समीपे तिष्ठति। प्रत्यहं गोपालः द्विवारं गां क्षीरं दोग्धि। प्रातः सायं च द्वौ गोदोहनकालौ भवतः। गोपः वामेन करेण पात्रं धृत्वा दक्षिणेन हस्तेन दुग्धं दोग्धि। प्रथमं वत्सः स्तन्यं पिबति पश्चात् पयः गां दोग्धि गोपालः। गोदोहनानन्तरं सः वत्सः पुनः पयः पिबति।

गावः प्रीत्या हरितानि तृणानि, पिण्याकं, कार्पास-बीजानि, बुसं च खादन्ति। ताः मधुरं क्षीरं वितरन्ति च। धेनूनां क्षीरं सर्वेषां पथ्यं भवति। क्षीरेण दधि, तक्रं, नवनीतं, घृतं च भवति। घृतेन वर्धते बुद्धिः। गोमयं, गोमूत्रं, घृतं, दधि, क्षीरं च पञ्चगव्यमिति प्रख्यातम्। एतत्प्राशनं सकलपापनिवारकम् इति मन्यन्ते। गौः अस्माभिः मातेव पूजनीया, देवतेव दर्शनीया, दीनेव दयनीया, निधिः इव रक्षणीया चास्ति॥

भुक्त्वा तृणानि शुष्काणि पीत्वा तोयं जलाशयात्।
दुग्धं ददाति लोकेभ्यः गावो लोकस्य मातरः॥

**अभ्यासः**

1. **संस्कृतभाषया उत्तरं लिखत —**

(१) गोः कति पादाः सन्ति? (२) गौः कीदृशी भवति? (३) वत्सः कुत्र अस्ति? (४) गोदोहनकालौ कौ? (५) गोपालः कथं दुग्धं दोग्धि? (६) गावः किं किं खादन्ति? (७) धेनूनां क्षीरं कथं भवति? (८) क्षीरेण किं किं भवति? (९) गौः अस्माभिः कथं रक्षणीया? (१०) लोकस्य मातरः काः?

2. **इमानि वाक्यानि पूरयत—**

(१) गोः —— शृङ्गे वर्तते।

(२) गोः एकं —— पुच्छं विद्यते।

(३) प्रत्यहं गोपालः —— गां क्षीरं दोग्धि।

(४) घृतेन वर्धते —— ।

(५) गौः —— इव पूजनीया ।

**3. अधोलिखितानां पदानां अन्तं, लिङ्गं, विभक्तिं, वचनं च लिखत—**

(१) गोः (२) अस्याः (३) करेण

(४) प्रीत्या (५) तृणानि (६) अस्माभिः

**4. इतरवचनद्वयं लिखत—**

(१) शृङ्गे (२) पादाः (३) गौः

(४) हस्तेन (५) धेनूनाम् (६) सर्वेषाम्

**5. पर्यायशब्दान् लिखत—**

(१) गौः (२) करः (३) पादः

(४) क्षीरम् (५) तोयम्

**6. विरुद्धार्थकपदानि लिखत—**

(१) प्रातः (२) वामः

(३) मधुरम् (४) पथ्यम्

**7. एषां रूपाणि पुरुषत्रये लिखत—**

(१) पिबति (२) मन्यते

(३) अस्ति (४) विद्यते

**8. एतानि वाक्ये योजयत —**

(१) धृत्वा (२) द्विवारम् (३) नवनीतम्

(४) रक्षणीया (५) भुक्त्वा

**9. एषां पदानां मध्ये स्थितं विजातीयपदं लिखत—**

(१) पादः, करः, मस्तकम्, काष्ठम् । (२) दधि, तक्रं, मधु, घृतम् ।

(३) गौः, मयूरः, गर्दभः, महिषी ।

**10.** **इमानि वाक्यानि बहुवचने लिखत—**

(१) एषा गौः । (२) गौः लोकस्य माता । (३) प्रत्यहं गोपालः गां क्षीरं दोग्धि । (४) धेनुः तृणं खादति ।

**ಶಬ್ದಾರ್ಥ**

चत्वारः=ನಾಲ್ಕು, शृङ्गम्=ಕೊಂಬು, पुच्छम्=ಬಾಲ, प्रकृत्या =ಸ್ವಭಾವದಿಂದ, वत्सः=ಕರು, दोहनं=ಹಾಲು ಕರೆಯುವುದು, पश्चात्=ಅನಂತರ, स्तन्यम् =ಹಾಲು, हरितानि = ಹಸುರಾದ, पिण्याकम्=ಹಿಂಡಿ, बुसम्=ಹೊಟ್ಟು, कार्पास-बीजानि=ಹತ್ತಿಬೀಜ, .पथ्यम् =ಹಿತಕರ, घृतम्=ತುಪ್ಪ, दधि =ಮೊಸರು, तक्रम् =ಮಜ್ಜಿಗೆ, नवनीतम्=ಬೆಣ್ಣೆ, प्राशनम्= ಕುಡಿಯುವುದು, शुष्काणि=ಒಣಗಿದ, तोयम्=ನೀರು.

---

**पञ्चमः पाठः**

# सम्भाषणम्

रामः ग्रामे वसति। तस्य वयस्यः गोविन्दः नगरे वसति। एकदा गोविन्दः रामस्य ग्रामं गच्छति तस्य च गृहे निवसति। रामः सायं गोविन्देन सह ग्रामे सञ्चरति। तदा गोविन्दः क्षेत्राणि उटजानि च पश्यति। तदा तयोः संवादः भवति।

गोविन्दः – भोः मित्र ! कस्य एतानि क्षेत्राणि ? क्षेत्राणां मध्ये गृहमिव दृश्यते। किमेतत् ?

रामः – एतानि मम मित्रस्य आनन्दस्य क्षेत्राणि। क्षेत्राणां मध्ये एतत् उटजम्। आनन्दः अस्मिन्नेव उटजे वसति।

गोविन्दः – एषः निर्जनः प्रदेशः। किमर्थं आनन्दः एतादृशे स्थले वसति ? कथं सः कालं नयति ?

रामः – भवता सम्यक् पृष्टम्। एषः आनन्दः भार्यया पुत्रैः सह अत्र निवसति। न तु एकाकी। कृषिकार्यं एव अस्य उद्योगः। अतः सः बलीवर्दौ, धेनुं, सारमेयं, कुक्कुटं च पालयति। सूर्योदयात् पूर्वं कुक्कुटः रवं करोति। तेन सः शयनात् उत्तिष्ठति। स्वकार्यं आरभते च।

आनन्दः हलेन भूमिं कर्षति। बलीवर्दौ हलं कर्षतः। अनन्तरं एषः क्षेत्रेषु बीजानि वपति। वृष्ट्या सस्यानि रोहन्ति। क्रमेण सस्यानि फलन्ति। पक्वेषु फलेषु सः धान्यकणानि संगृहणाति। एवं सः विपुलं धान्यं लभते।

गोविन्दः- तर्हि तस्य धेन्वा वा सारमेयेण वा किं प्रयोजनम् ?

रामः- धेनुः तस्मै दुग्धं वितरति। सारमेयः तस्य क्षेत्राणि उटजं च चोरेभ्यः रक्षति।

गोविन्दः- कष्टमयं तर्हि अस्य आनन्दस्य जीवितम्। किमर्थं एषः एवं परिश्रमं करोति? नगरे एतादृशः परिश्रमः आवश्यकः न भवति किल?

रामः- एषः परिश्रमेण एव आवश्यकं धनं, सुखं, आरोग्यं च लभते। अस्य शरीरं रोगाः न पीडयन्ति। अतः सः सन्तोषेण सुखेन च जीवति। क्षेत्रेषु शुद्धः वायुः वहति। निर्मलं जलं विद्यते। सात्विकं च आहारं भक्षयति। नगरे तु सर्वं विपरीतम्। कृत्रिमैः साधनैः जनाः जीवन्ति। अन्यच्च तस्य कृषीवलस्य परिश्रमेणैव वयं धान्यं लब्ध्वा जीवामः।

गोविन्दः- भो मित्र! एतादृशस्य कृषीवलस्य जीवितस्य महत्वं ज्ञातं मया। धन्यवादाः। दिवाकरः अस्तं गतः। गृहं निवर्तामहे।

## अभ्यासः

1. **संस्कृतभाषया उत्तरं लिखत—**

(१) रामस्य वयस्यः कः? (२) आनन्दः कैः सह निवसति? (३) आनन्दः कान् पालयति? (४) सारमेयः किं करोति? (५) ग्रामेषु कृषीवलाः कथं जीवन्ति?

2. **रिक्तस्थानानि पूरयत—**

(१) कृषिकार्यं एव कृषीवलस्य —— ।
(२) सूर्योदयात् पूर्वं —— रवं करोति ।
(३) बलीवर्दौ —— कर्षतः ।
(४) धेनुः —— वितरति ।
(५) —— शरीरं रोगाः न पीडयन्ति ।

3. **पर्यायशब्दान् लिखत—**

| | | |
|---|---|---|
| (१) उटजम् | (२) भार्या | (३) सारमेयः |
| (४) बलीवर्दः | (५) भूमिः | (६) रोगः |

4. **इतरवचनद्वयं लिखत—**

| | | |
|---|---|---|
| (१) क्षेत्राणि | (२) तस्य | (३) अस्मिन् |
| (४) भार्यया | (५) धेन्वा | (६) साधनैः |

5. **इमानि वाक्यानि प्रश्नवाक्यानि कुरुत—**

(१) गोविन्दः क्षेत्राणि पश्यति । (२) आनन्दः हलेन भूमिं कर्षति । (३) क्षेत्रेषु शुद्धः वायुः वहति । (४) धेनुः दुग्धं वितरति । (५) रामः सायं गोविन्देन सह ग्रामे सञ्चरति ।

6. **एतानि वाक्ये योजयत—**

(१) एकदा (२) सम्यक् (३) उत्तिष्ठति
(४) विपुलम् (५) सन्तोषेण

7. **ससन्दर्भं विवृणुत—**

(१) आनन्दः अस्मिन्नेव उटजे वसति ।
(२) कष्टमयं तर्हि अस्य आनन्दस्य जीवितम् ।

8. कृषीवलः कथं जीवति ? सः कथं लोकाय अन्नं ददाति ? विवृणुत ।

**ಶಬ್ದಾರ್ಥ**

उटजम् =ಗುಡಿಸಲು, संवादः =ಸಂಭಾಷಣೆ, निर्जनः = ಜನರಿಲ್ಲದ, रवम् =ಶಬ್ದವನ್ನು, विपुलम्=ಬಹಳ, हलेन =ನೇಗಿಲಿನಿಂದ, विपरीतम् = ವಿರುದ್ಧವಾಗಿದೆ, निवर्तामहे = ಹಿಂತಿರುಗೋಣ.

---

**षष्ठः पाठः**

# श्रीकृष्णस्य उपदेशः

कुरुक्षेत्रे सर्वे पाण्डवाः कौरवाः च युद्धाय सन्नद्धाः आसन्। अर्जुनः एकः महावीरः। तस्य सारथिः भगवान् श्रीकृष्णः। सः स्वस्य रिपून् कौरवान् हन्तुं समराङ्गणं प्रति धनुः, शस्त्राणि, अस्त्राणि च सङ्गृह्य रथेन सोत्साहं प्रस्थितः। उभयोः पक्षयोः सर्वे युद्धसन्नद्धाः अभवन्। तदा पार्थः सूतं श्रीकृष्णं प्रति वदति।

अर्जुनः – भगवन्, उभयोः सेनयोः मध्ये मे रथं स्थापय।

श्रीकृष्णः– सखे, कुतः ?

अर्जुनः– अत्र के के उपस्थिताः इति प्रथमं पश्यामि।

श्रीकृष्णः– तथास्तु। (रथं मध्ये स्थापयति। अर्जुनः युद्धे सन्नद्धान् गुरून्, बन्धून्, मित्राणि च पश्यति।)

अर्जुनः– "भगवन्, एते द्रोणादयः मम गुरवः। अयं गुरुपुत्रः अश्वत्थामा। एते शल्यादयः मातुलाः। इमे दुर्योधनादयः भ्रातरः। असौ भीष्मः – अस्मत्पितामहः। ते च मम वयस्याः। कथं नु एभिः साकं युध्येय?" इति वदति। एवं वदतः तस्य गात्रं वेपते स्म। रोमाञ्चनं अभवत्। हृदयं अद्रवत्। गाण्डीवं धनुः हस्तात् परिच्युतम्। नेत्राभ्यां अश्रूण्यगलन्। ततः सः दैन्येन कृष्णं उद्दिश्य विषण्णोऽवदत्।

अर्जुन – "सखे! कथं एतान् गुरुन्, बन्धून्, वयस्यान् च संहराणि? सर्वान् हत्वा प्राप्तेन राज्येन किं मे स्यात्? युद्धं तावत् हिंस्रं कर्म। एतैः सार्धं नाहं योद्धुं

इच्छामि। ते एव धार्तराष्ट्राः राज्यं परिपालयन्तु। युद्धात् भिक्षया जीवनं एव वरं" इत्युक्त्वा तूष्णीं स्थितः।

तदा श्रीकृष्णः विषण्णं अर्जुनं एवं उपदिशति "अये! महावीर, पार्थ! कुतः ते व्यामोहः? कुत्र गतं ते शौर्यम्? क्व यातः ते उत्साहः? पूर्ववृत्तं सर्वं स्मर किञ्चित्। त्वं क्षत्रियोऽसि, दुष्टशिक्षणं शिष्टपरिपालनं च क्षत्रियाणां धर्मः। कर्तव्यं कर्म अप्रमत्तः श्रद्धया कुरु। न ते पापलेशोऽपि। श्रेयः ते भविष्यति।

"हतो वा प्राप्स्यसे स्वर्गं जित्वा वा भोक्ष्यसे महीम्" अतः दुष्टान् संहर। साधून् परिपालय। युद्धं हि क्षत्रियाणां धर्मः। स्वधर्मे निधनं श्रेयः। शत्रून् पराजयस्व। राज्यं लभस्व। यदि त्वं स्वधर्मेण वर्तसे तर्हि प्रजाः अपि धर्मेण वर्तन्ते। यथा राजा तथा प्रजाः। युध्यस्व विगतज्वरः। अयमेव ते मुख्यो धर्मः" इति।

यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः।
स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते॥

## अभ्यासः

**1. संस्कृतभाषया उत्तरं लिखत—**

(१) कुरुक्षेत्रे के युद्धसन्नद्धाः अभवन्? (२) अर्जुनस्य सारथिः कः? (३) अर्जुनः समराङ्गणं किमर्थं प्रस्थितः? (४) युद्धभूमौ अर्जुनः कान् कान् अपश्यत्? (५) अर्जुनस्य हस्तात् किं परिच्युतम्? (६) क्षत्रियाणां धर्मः कः? (७) प्रजाः कदा धर्मेण वर्तन्ते? (८) लोकः किम् अनुवर्तते?

**2. ससंदर्भं मातृभाषया अर्थं विवृणुत—**

(१) उभयोः सेनयोः मध्ये मे रथं स्थापय। (२) कथं नु एभिः साकं -युध्येय? (३) पूर्ववृत्तं सर्वं स्मर किञ्चित्। (४) स्वधर्मे निधनं श्रेयः। (५) यथा राजा तथा प्रजाः।

**3. इमानि वाक्यानि पूरयत—**

(१) भगवन्! एते द्रोणादयः मम —— ।

(२) एषः भीष्मः अस्मत् —— ।

(३) युद्धं तावत् —— कर्म ।

(४) युद्धात् —— जीवनमेव वरम्।

(५) धनुः —— परिच्युतम्।

(६) हतो वा प्राप्स्यसे —— ।

**4. पर्यायशब्दान् लिखत—**

| | | | |
|---|---|---|---|
| (१) रिपुः | (२) समरः | (३) धनुः | (४) भ्राता |
| (५) गात्रम् | (६) बन्धुः | (७) श्रेयः | (८) सूतः |

**5. एतेषां अन्तं, लिङ्गं, विभक्तिं, वचनं च लिखत—**

(१) कुरुक्षेत्रे (२) रिपून् (३) रथेन (४) पक्षयोः
(५) मे (६) के (७) अयम् (८) एभिः
(९) युद्धात् (१०) श्रद्धया

**6. सन्धिं विभज्य सन्धिनाम लिखत—**

(१) अश्रूण्यगलन् (२) विषण्णोऽवदत् (३) इत्युक्त्वा
(४) क्षत्रियोऽसि (५) पापलेशोऽपि (६) तयास्तु

**7. एषां रूपाणि पुरुषत्रये लिखत—**

(१) अभवत् (२) वेपते
(३) अवदत् (४) पालयतु

**8. एतानि वाक्येषु योजयत—**

(१) अत्र (२) असौ (३) हत्वा
(४) क्व (५) किञ्चित्

**9. एषां पदानां मध्ये स्थितं विजातीयपदं सूचयत—**

(१) रामाय, आदाय, गुरवे, हरये ।
(२) संगम्य, विजित्य, पश्य, प्रणम्य
(३) मतिः. मुनिः, कविः, रविः ।
(४) लोचनम्, आननम्, नयनम्, नेत्रम् ।

**10. एतानि प्रश्नवाक्यानि कुरुत—**

(१) अर्जुनः महावीरः आसीत् ।
(२) ते मम वयस्याः ।
(३) गाण्डीवं धनुः हस्तात् परिच्युतम्
(४) युद्धं हि क्षत्रियाणां धर्मः ।

11. श्रीकृष्णार्जुनयोः संवादं मातृभाषया लिखत।

12. अभ्यास्यत –

महाभारतं पञ्चमो वेदः।

महाभारतस्य कर्ता भगवान् व्यासः।

महाभारते अष्टादश पर्वाणि सन्ति।

महाभारते शतसहस्रं श्लोकाः सन्ति।

महाभारते एव श्रीमद्भगवद्गीता अन्तर्भूता।

**ಶಬ್ದಾರ್ಥ**

सन्नद्धाः=ಸಿದ್ಧರಾಗಿ, अश्रूणि=ಕಣ್ಣೀರು, अगलन्= ಸುರಿದವು, हिंस्रम्=ಕ್ರೂರವಾದ, तूष्णीं = ಸುಮ್ಮನೆ, अप्रमत्तः = ಎಚ್ಚರಿಕೆಯುಳ್ಳವನು, लोकः=ಜನ, विषण्णाः=ವಿಷಾದಗೊಂಡ, धार्तराष्ट्राः = ಧೃತರಾಷ್ಟ್ರನ ಮಕ್ಕಳು, निधनम् = ಸಾವು, विगतज्वरः = ವ್ಯಥೆಯಿಲ್ಲದವನಾಗಿ.

---

**सप्तमः पाठः**

# पार्वती परमेश्वरं वक्रभणित्या पराजयते

पार्वती परमेश्वरस्य प्रेयसी। तयोः प्रीतिः निरतिशया। एकदा परशिवः एकाकी बहिः गत्वा गृहं प्रति निवर्तते। आगतं हृदयवल्लभं अगजा गवाक्षेणापश्यत्। तदानीं द्वारं

पिहितं आसीत्। उद्घाटनार्थं शङ्करः कवाटं अङ्गुल्या प्रहरति। तदा गिरिजा सरससंल्लापेन तं पराजेतुं इच्छन्ती भणति।

पार्वती — अङ्गुल्या कवाटं कः प्रहरति ?

शिवः — अहमस्मि, प्रिये।

पा. — कः त्वम् ?

शि. — अहं शूली।

पा. — किम् ? किम् ? किं ते शूलरोगः वर्तते ?
नाहं वैद्या। कञ्चित् वैद्यं प्रति याहि।

शि. — प्रियतमे ! अहं नीलकण्ठः।

पा. — किम् ? त्वं नीलकण्ठः।
तर्हि एकां केकां कुरु।

शि. — प्रेयसि ! अहं पशुपतिः अस्मि।

पा. — अहो पशुपतिः ! कुत्र ते शृङ्गे ?

शि. — अये, नाहं वृषभः। अहं स्थाणुः अस्मि।

पा. — यदि त्वं स्थाणुः कथं भाषसे ?
स्थाणुः नाम शुष्कः तरुः।

शि. — अहं शिवायाः पतिः अस्मि।

पा. — किम् ? किम् ?

शृगाल्याः पतिः शृगालोऽसि। वनं याहि।

अत्र किं ते कार्यं अस्ति ?

एवं पार्वती शब्दच्छलेन शिवं पराजयत।

तौ जगदादिमौ दम्पती अस्मान् पाताम्॥

**अभ्यासः**

1. **संस्कृतभाषया उत्तरं लिखत—**

(१) पार्वती का ? (२) पार्वतीपरमेश्वरयोः प्रीतिः कीदृशी ? (३) पार्वती आगतं हृदयवल्लभं केन अपशत् ? (४) शङ्करः कवाटं कया प्रहरति ? (५) पार्वती केन शिवं पराजयत ?

2. **इतरवचनद्वयं लिखत—**

(१) इच्छन्ती (२) प्रेयसी (३) स्थाणुषु
(४) अङ्गुल्या (५) शृङ्गे (६) अस्मान्

3. **एतानि पुरुषत्रये लिखत—**

(१) याहि (२) अपश्यत् (३) पराजयत
(४) पाताम् (५) भजति (६) भाषते

4. **पर्यायशब्दान् लिखत—**

(१) शिवः (२) प्रेयसी (३) वल्लभः
(४) नीलकण्ठः (५) वृषभः

**5. विरुद्धार्थकपदानि लिखत—**

(१) आगतः (२) अस्ति (३) बहिः
(४) स्वधर्मः (५) पिहितम्

**6. एषां शब्दानां निर्दिष्टविभक्तिरूपाणि लिखत—**

(१) पार्वती —— चतुर्थी विभक्तिः ।

(२) वैद्या —— तृतीया विभक्तिः ।

(३) पशुपतिः —— सप्तमी विभक्तिः ।

(४) तरुः —— षष्ठी विभक्तिः ।

**7. एतानि वाक्येषु योजयत—**

(१) यदि – तर्हि (२) पराजेतुम्
(३) गत्वा (४) तदानीम्

**8.** पार्वतीपरमेश्वरयोः सरससंल्लापं मातृभाषया लिखत ।

### ಶಬ್ದಾರ್ಥ

पराजयते = ಸೋಲಿಸುತ್ತಾಳೆ, बल्लभम् = ಪತಿಯನ್ನು, कवाटम् = ಬಾಗಿಲನ್ನು, शूली = ಈಶ್ವರ, ಹೊಟ್ಟೆ ನೋವುಳ್ಳವನು, नीलकण्ठः = ಈಶ್ವರ, ನವಿಲು, पशुपतिः = ಈಶ್ವರ, ವೃಷಭ, स्थाणु = ಈಶ್ವರ, ಮೋಟುಮರ, शिवा = ಪಾರ್ವತಿ, ಹೆಣ್ಣು ನರಿ, पाताम् = ರಕ್ಷಿಸಲಿ, शृगालः ನರಿ, गवाक्षेण = ಕಿಟಕಿಯಿಂದ.

अष्टमः पाठः

# सङ्घजीवी मानवः

प्राणिषु मानवः श्रेष्ठः। न तत्र कारणं शक्तिः आकारो वा। किन्तु असदृशी बुद्धिः विवेकः च। तथापि लोकेऽस्मिन् एकैकस्मात् प्राणिनः वस्तुनः च मानवस्य ज्ञातव्यं किञ्चित् विद्यते।

एतान् काकान् पश्यत। गृहात् बहिः क्षिप्ते अन्ने तूर्णं वायसाः 'का का' इति रटन्तः तत् परितः आयान्ति। विना कलहं सङ्घीभूय भक्षयन्ति। परं तु भिक्षुकाः अन्यं भिक्षुकं वीक्ष्य कलहं कुर्वन्ति। अत एवोक्तम्—

काक आह्वयते काकान् याचको न तु याचकान्।
काकयाचकयोर्मध्ये वरं काको न याचकः॥ इति।

इतः पश्यत, इमान् पालितान् शुनकान्। शुनकस्य स्वामिनि महती भक्तिः वर्तते। सः रात्रौ निद्राति। तथापि कस्मिंश्चित् शब्दे श्रुते झटिति उत्थाय उच्चैः भषति। प्रभुं शयनात् उत्थापयति। सः रात्रौ तस्करेभ्यः स्वामिनं रक्षति। अल्पेनैवाहारेण सन्तुष्यति च। अत एवोच्यते –

बह्वाशी अल्पसन्तुष्टः सनिद्रः शीघ्रचेतनः।
प्रभुभक्तिश्च शौर्यं च मन्तव्याः षट् शुनो गुणाः॥ इति।

इतः एतान् भ्रमरान् विलोकयत। ते मधुरं गुञ्जन्ति। प्रतिपुष्पं भ्रमन्ति। कुसुमेभ्यः मकरन्दं चूषन्ति। पुष्पाणि न विनाशयन्ति। सुन्दरं मधुकोशं निर्मान्ति। तस्मिन् मधु उत्पादयन्ति। सपदि ते तत् न पिबन्ति। यदा कदा वा पिबामः इति सञ्चिन्वन्ति। परं तु तन्मधु मानवेनापह्रियते। एषां मधुपानां व्यवहारेण सञ्चयबुद्धिं शिक्षामहे। एवमेव पिपीलिकाः अपि सञ्चये परमकुशलाः सङ्घीभूय कार्यं कुर्वन्ति च।

तथा पृथिवी, आपः, तेजः, वायुः, आकाशः इति पञ्चभूतान्यपि परोपकारायैव निर्मितानि। मानवः एकैकस्मात् प्राणिनः वस्तुनः च एकैकं उत्तमं गुणं सङ्गृह्य कुशलो भवेत्।

क्षणशः कणशश्चैव विद्यामर्थं च साधयेत्।
क्षणे नष्टे कुतो विद्या कणे नष्टे कुतो धनम्॥

**अभ्यासः**

1. संस्कृतभाषया उत्तरं लिखत—

(१) प्राणिषु कः श्रेष्ठः ? (२) वायसाः अन्नं दृष्ट्वा किं कुर्वन्ति ? (३) भिक्षुकाः किं कुर्वन्ति ? (४) शुनकस्य कस्मिन् भक्तिः वर्तते ? (५) शुनकः रात्रौ किं करोति ? (६) मधुपैः सञ्चितं मधु केन ? अपह्रियते ? (७) मधुपानां व्यवहारेण किं शिक्षामहे ? (८) पिपीलिकाः किं कुर्वन्ति ? (९) पञ्चभूतानि कानि ? एतानि किमर्थं निर्मितानि (१०) मानवः कथं कुशलः भवेत् ?

**2. रिक्तस्थानानि पूरयत—**

(१) भ्रमराः मधु —— ।
(२) काकयाचकयोर्मध्ये —— वरः ।
(३) —— उच्चैः भषति ।
(४) —— का का इति रटति ।
(५) —— सुन्दरं मधुकोशं निर्मान्ति ।

**3. सन्धि विभज्य सन्धिनाम लिखत—**

(१) लोकेऽस्मिन् (२) अल्पेनैवाहारेण (३) एवोच्यते
(४) मानवेनापह्रियते (५) पञ्चभूतान्यपि (६) परोपकारायैव
(७) एकैकम् (८) चैव

**4. सम्यक् योजयत—**

| अ | आ |
|---|---|
| श्वा | गुञ्जति |
| तस्करः | भषति |
| भ्रमरः | चोरयति |
| पिपीलिका | रटति |
| काकः | सञ्चिनोति |
| सिंहः | पश्यति |
| बालकः | गर्जति |

**5. एषां लकारं, पुरुषं, वचनं च लिखत—**

(१) आयान्ति (२) पश्यत (३) निद्राति
(४) विलोकयत (५) शिक्षामहे

**6. एषां पदानां अन्तं, लिङ्गं, विभक्तिं, वचनं च लिखत—**

(१) गृहात् (२) अस्मिन् (३) काकान्
(४) शयनात् (५) गुणाः

**7. व्याकरणविशेषं लिखत—**

(१) गृहात् बहिः । (२) तत् परितः । (३) कलहं विना ।

**8. एतानि वाक्येषु योजयत—**

(१) वीक्ष्य (२) तथापि (३) उत्थाय
(४) यदा कदा वा (५) परोपकाराय

**9. पर्याय शब्दान् लिखत—**

(१) प्राणी (२) काकः (३) कलहः
(४) शुनकः (५) पृथिवी (६) वित्तम्

**10. मातृभाषया उत्तरं लिखत—**

(१) शुनकस्य गुणान् लिखत ।

(२) भ्रमरस्य कृत्यं विशदयत ।

(३) विद्यां अर्थं च कथं साधयेत् ? विवृणुत ।

(४) "मानवः सङ्घजीवी" कथम् ? विशदयत ।

**ಶಬ್ದಾರ್ಥ**

असदृशी = ಎಣೆಯಿಲ್ಲದ, परितः = ಸುತ್ತಲೂ, तूर्णं, झटिति, सपदि = ಬೇಗ, वीक्ष्य = ನೋಡಿ, उत्थाय = ಎದ್ದು, उच्चैः=ಗಟ್ಟಿಯಾಗಿ, आपः =ನೀರು, मधुकोशः = ಜೇನು ಗೂಡು, चूषन्ति = ಹೀರುತ್ತವೆ, कणशः = ಕಾಳು ಕಾಳಾಗಿ, पिपीलिका = ಇರುವೆ.

नवमः पाठः

# छान्दसानां कविता

पुरा धारानगरे भोजो नाम संस्कृतभाषाप्रियः भूपतिः राज्यं अपालयत्। तस्य आस्थाने बहवः विद्वांसः कवयः च अवर्तन्त। भोजः स्वयं पण्डितः काव्यज्ञः कविः च अभूत्। चम्पूरामायणं नाम मनोज्ञं काव्यं भोजेन प्रणीतम्। सः नृपतिः कवीन् विशेषेण पुरस्कृत्य तेभ्यः पुष्कलं धनं प्रयच्छतीति कीर्तिः सर्वत्र प्रसृतासीत्। राजसभायां कालिदासादयः बहवः कवयः व्यराजन्त।

नरपतिं कवित्वप्रियं ज्ञात्वा केचित् छान्दसाः धारानगरं आगच्छन्। ते श्रुतिस्मृत्यादिषु प्रवीणाः, परं कवित्वे न कुशलाः। ते वैदिकाः नगरस्थं भुवनेश्वरीमन्दिरं गत्वा "कवित्वं करिष्यामः" इत्युपविष्टाः। चिरं आलोच्य तेष्वन्यतमः श्लोकस्य प्रथमं पादं अरचयत् "भोजनं देहि राजेन्द्र" इति। ततः महता यत्नेन अन्यः द्वितीयं पादं एवं अपूरयत् "घृतसूपसमन्वितम्" इति। तदा एवं तैः छान्दसैः प्रथमार्धं रचितम्। द्वितीयार्धं कथमपि नास्फुरत्। सर्वे चिन्ताकुलाः जाताः।

तस्मिन् एव समये देवताभवनं कालिदासः प्रणामार्थं आगतः। सः वैदिकान् दृष्ट्वा तेषां वृत्तान्तं अपृच्छत्। ते

च स्वीयं वृत्तं निवेद्य स्वकृतं श्लोकार्धं अदर्शयन्। "उत्तरार्धं न स्फुरति" इति च अब्रुवन्। कालिदासः स्मित्वा उत्तरार्धं एवं अब्रवीत् "माहिषं च शरच्चन्द्र-चन्द्रिकाधवलं दधि" इति।

परेद्युः ते छान्दसाः राजसभां प्रविश्य भोजराजस्य पुरतः इमं श्लोकं अपठन्—

भोजनं देहि राजेन्द्र घृतसूपसमन्वितम्।
माहिषं च शरच्चन्द्रचन्द्रिकाधवलं दधि ॥

धारेश्वरो भोजः तत्पद्यमाकर्ण्य "येन पूर्वार्धं प्रयासेन निर्मितं तेन पुनः कदाचिदपि कवित्वे श्रमो न कर्तव्यः। उत्तरार्धस्य किञ्चित् पारितोषिकं दातुं इच्छामि, न पूर्वार्धस्य" इत्युक्त्वा सुवर्णनिष्कान् दत्वा तान् विप्रान् व्यसर्जयत्।

कान् पृच्छामः सुराः स्वर्गे निवसामो वयं भुवि।
किं वा काव्यरसः स्वादुः किं वा स्वादीयसी सुधा ॥

## अभ्यासः

1. संस्कृतभाषया उत्तरं लिखत —

(१) धारानगरस्य भूपतिः कः ? सः कीदृशः आसीत्? (२) भोजराजस्य आस्थाने के के अवर्तन्त? (३) भोजराजेन प्रणीतं काव्यं किम्? (४) भोजराजस्य सभायां कः व्यराजत? (५) छान्दसाः किमर्थं धारानगरं आगच्छन् ? (६) छान्दसैः श्लोकस्य

प्रथमार्धं कथं रचितम्? (७) छान्दसाः किमर्थं चिन्ताकुलाः जाताः? (८) कालिदासः किमर्थं भुवनेश्वरीमन्दिरं आगतः? (९) छान्दसाः कालिदासं किं अब्रुवन्? (१०) भोजराजः छान्दसैः विरचितं श्लोकं श्रुत्वा किं अवदत्?

2. **रिक्तस्थानानि पूरयत –**

(१) भोजः स्वयं पण्डितः ——च ।

(२) भोजराजस्य कीर्तिः सर्वत्र —— आसीत् ।

(३) छान्दसाः श्रुतिस्मृत्यादिषु प्रवीणाः न तु —— ।

(४) द्वितीयार्धं कथमपि —— ।

(५) किं वा स्वादीयसी —— ।

3. **पर्यायशब्दान् लिखत –**

(१) सुधा (२) वृत्तान्तः (३) अब्रवीत् (४) सुवर्णम्
(५) पुष्कलम् (६) कीर्तिः (७) वैदिकः (८) दृष्ट्वा

4. **विरुद्धार्थक शब्दान् लिखत –**

(१) उपविशति (२) आगतः (३) परेद्युः (४) सुरः

5. **सन्धि विगृह्य सन्धिनाम लिखत –**

(१) राजेन्द्रः (२) प्रयच्छतीति (३) प्रसृतासीत् (४) इत्युपविष्टाः
(५) तेष्वन्यतमः (६) नास्फुरत (७) इत्युक्त्वा

6. **ससन्दर्भं विवृणुत –**

(१) उत्तरार्धं न स्फुरति ।

(२) उत्तरार्धस्य किञ्चित् पारितोषिकं दातुं इच्छामि ।

**7. वाक्यदोषान् समीकुरुत –**

(१) भोजेन मनोज्ञं काव्यं प्रणीतः ।

(२) ते श्रुतिस्मृत्यादिषु प्रवीणः ।

(३) सर्वे चिन्ताकुलाः जातः ।

**8. एषां पदानां अन्तं, लिङ्गं, विभक्तिं, वचनं च लिखत–**

(१) भोजेन (२) कवीन् (३) श्लोकस्य
(४) तस्मिन् (५) वैदिकान्

**9. एतानि वाक्ये योजयत –**

(१) निवेद्य (२) स्वयम् (३) कथमपि (४) आकर्ण्य

**10. मातृभाषया उत्तरं लिखत –**

(१) छान्दसाः किमर्थं चिन्ताकुलाः जाताः ?

(२) धारेश्वरः पूर्वार्धस्य पारितोषिकं कुतो न अयच्छत ?

**ಶಬ್ದಾರ್ಥ**

छान्दसाः=ವೇದವನ್ನು ತಿಳಿದವರು, मनोज्ञम् = ಸುಂದರವಾದ, पुष्कलम् = ಬಹಳ, न अस्फुरत् = ಹೊಳೆಯಲಿಲ್ಲ, निवेद्य =ತಿಳಿಸಿ, घृतसूपसमन्वितम् = ತುಪ್ಪತೊವ್ವೆಗಳಿಂದ ಕೂಡಿದ, माहिषं दधि = ಎಮ್ಮೆಯ ಮೊಸರು, सुवर्णनिष्कान् = ಚಿನ್ನದ ನಾಣ್ಯಗಳನ್ನು, स्वादीयसी =ಅತ್ಯಂತ ರುಚಿಕರವಾದ, शरच्चन्द्रचन्द्रिकाधवलम्=ಶರತ್ಕಾಲದ ಚಂದ್ರನಬೆಳದಿಂಗಳಿನಂತೆ ಬೆಳ್ಳಗಿರುವ.

दशमः पाठः

# चक्रव्यूहभेदः

महाभारतयुद्धस्य दशमे दिने कौरवाणां सेनापतिः भीष्मः पराजितः शरशय्यायां शयितवान्। ततः द्रोणाचार्यः तत्पदे नियुक्तः दुर्योधनेन।

परेद्युः अर्जुनः संशप्तकैः सह योद्धुं अगच्छत्। तस्मिन् दिने द्रोणः अभेद्यं चक्रव्यूहं निर्माय योद्धुमारभत। द्रोणेन रचितं चक्रव्यूहं भेत्तुं अर्जुनं विना न कोऽपि पाण्डवः समर्थः। अतः युधिष्ठिरः चिन्ताकुलः अभवत्। तदा खिन्नमनस्कं धर्मराजं उपगम्य अभिमन्युः—

"आर्य! अहं चक्रव्यूहं भेत्तुं समर्थः अस्मि। अहं तां युक्तिं जानामि। अतः अनुमतिः दीयताम्।" इति अवदत्। युधिष्ठिरः चक्रव्यूहभेदस्य आवश्यकतां विचार्य तदा तस्मै अनुमतिं प्रायच्छत्।

अभिमन्युः पितृन् अभिवाद्य चक्रव्यूहं प्रति प्रस्थितः। व्यूहद्वारे द्रोणः स्वयमेव अतिष्ठत्। सः अभिमन्यौ बाणवृष्टिं अकरोत्। पश्यतः द्रोणस्य अभिमन्युः व्यूहं भित्वा व्यूहान्तरमगच्छत्। यद्यपि अभिमन्युः व्यूहमध्ये एकाकी अभवत्, तथापि सः अलौकिकं युद्धकौशलं

प्रादर्शयत्। तस्य शरवर्षात् सर्वे कौरवाः भीताः। किंकर्तव्यतामूढाः अभवन् दुर्योधनादयः।

अथ कर्णः द्रोणसमीपं गत्वा अभिमन्युवधोपायं अपृच्छत्। तदा द्रोणः अवदत् – "यावत् अभिमन्युः अभेद्यं कवचं परिधाय रथस्थः सशस्त्रः एव युध्यते तावत् न कोऽपि तं पराजेतुं शक्नोति" इति।

एतत् श्रुत्वा कर्णः तथा अन्ये योधाः अभिमन्युं निःशस्त्रं रथभ्रष्टं च अकुर्वन्। तथापि अभिमन्युः धैर्येण अयुध्यत। रथचक्रं गृहीत्वा एव योद्धुं प्रारभत। अश्वत्थामानं पराजित्य महता शौर्येण अयुध्यत। तस्मिन् समये कर्णादयः कौरवाः पश्चात् स्थित्वा वञ्चनया तस्योपरि प्रहारं अकुर्वन्। तेन प्रहारेण अभिमन्युः हतः। धिक् इमान् कौरवान्। इति वदन्तो देवाः व्यषीदन्। अभिमन्योर्यशस्तु आचन्द्रतारकं विराजते।

### अभ्यासः

1. संस्कृतभाषया उत्तरं लिखत—

(१) पराजितः भीष्मः कुत्र शयितवान् ? (२) अर्जुनः कैः सह योद्धुं अगच्छत्? (३) युधिष्ठिरः किमर्थं चिन्ताकुलः अभवत् ? (४) खिन्नमनस्कं धर्मराजं उपगम्य अभिमन्युः किमवदत्? (५) कर्णः द्रोणसमीपं गत्वा किं अपृच्छत्? (६) द्रोणः कर्णं किं अवदत्?

**2.** **रिक्तस्थानानि पूरयत—**

(१) द्रोणः अभेद्यं —— निर्माय योद्धुमारभत।

(२) अभिमन्युः —— युद्धकौशलं प्रादर्शयत्।

(३) दुर्योधनादयः भीताः —— अभवन्।

(४) —— गृहीत्वा एव अभिमन्युः योद्धुं प्रारभत।

(५) अभिमन्योः —— आचन्द्रतारकं विराजते।

**3.** **सन्धि विभज्य नाम लिखत—**

(१) कोऽपि (२) प्रायच्छत् (३) तथापि (४) तस्योपरि

**4.** **एतानि वाक्ये योजयत—**

(१) नियुक्तः (२) निर्माय (३) भेत्तुम्
(४) गत्वा (५) योद्धुम्

**5.** **इतरवचनद्वयं लिखत—**

(१) दुर्योधनेन (२) ताम् (३) पितॄन्
(४) योधाः (५) वञ्चनया (६) इमान्

**6.** **पर्यायशब्दान् लिखत—**

(१) सेनापतिः (२) युक्तिः (३) योधः (४) तारका

**7.** **व्याकरणविशेषं लिखत—**

(१) अर्जुनं विना। (२) संशप्तकैः सह। (३) धिक् इमान्।

**8.** **क्रियापदानां लकार पुरुष वचनानि लिखत—**

(१) आरभत (२) प्रायच्छत् (३) युध्यते
(४) शक्नोति (५) अकुर्वन् (६) विराजते

**9.** **मातृभाषया उत्तरं लिखत—**

(१) अभिमन्युः कथं युद्धं अकरोत् ?

(२) अभिमन्युः कथं चक्रव्यूहे हतः ?

**ಶಬ್ದಾರ್ಥ**

पश्यतः द्रोणस्य=ದ್ರೋಣಾಚಾರ್ಯರು ನೋಡುತ್ತಿದ್ದಾಗ್ಯೂ, (ಇಲ್ಲಿ ಅನಾದರ ತೋರುತ್ತದೆ) स्विन्नमनस्कम् = ದುಃಖದಿಂದ ಕೂಡಿದ ಮನುಸ್ಸುಳ್ಳವನನ್ನು, परिधाय = ಧರಿಸಿ, प्रहारम् = ಹೊಡೆತವನ್ನು, आचन्द्रतारकम् =ಚಂದ್ರನೂ ನಕ್ಷತ್ರಗಳೂ ಇರುವವರೆಗೆ.

---

एकादशः पाठः

# कृपणस्य धनम्

एकस्मिन् अग्रहारे कश्चित् पुरुषः वसति स्म। सः अतीव कृपणः आसीत्। कथञ्चित् सः प्रभूतं वित्तं संपादितवान्। सञ्चितं सर्वं धनं सः एकस्मिन् ताम्रभाजने निक्षिप्यारक्षत्।

अन्यस्मिन् पर्वदिने उषसि सः कृपणः स्नानार्थं नदीं अगच्छत्। गमनसमये ताम्रभाजने सञ्चितं धनमपि अनयत्। किन्तु तत्र तस्य वित्तस्य रक्षणं कथं इति चिन्ताकुलः अभवत्।

तदा तेन एकः उपायः चिन्तितः। सः नद्याः तीरे सिकतासु गर्तमेकं विधाय तस्मिन् धनपात्रं रहसि न्यक्षिपत्। "एतदन्यो न अवगच्छेत् स्वयञ्च तदनायासेन लभेय" इति बुध्या तदुपरि सिकताभिः शिवलिङ्गमेकं अकरोत्। ततः सः स्नानार्थं अगच्छत्।

तदा तत्र आगताः सर्वेऽपि यात्रिकाः इदं सैकतलिङ्गं विलोक्य "अस्मिन् तीर्थे सैकतलिङ्गनिर्माणं संप्रदाय इत्यमन्यन्त। ततः सर्वोऽपि एकैकं लिङ्गं निर्माय स्नानार्थं अगच्छन्।

यदा सः कृपणः स्नानं समाप्य प्रत्यागच्छत् तदा सः सर्वं नदीतीरं सैकतलिङ्गैः युक्तं ऐक्षत। तत्र स्वताम्रभाजनं अन्वेष्टुं असमर्थः च अभवत्। तदा अतीव दुःखितः सः एवं अवदत्—

गतानुगतिको लोको न लोकः पारमार्थिकः।
गङ्गासैकतलिङ्गेन नष्टं मे ताम्रभाजनम्॥ इति।

### अभ्यासः

1. संस्कृतभाषया उत्तरं लिखत —

(१) कृपणः किं संपादितवान्? (२) कृपणः किमर्थः नदीं अगच्छत्? (३) कृपणः नद्याः तीरे धनपात्रं कथं अरक्षत्? (४) यात्रिकाः सैकतलिङ्गं विलोक्य किमिति अमन्यन्त? (५) अतीव दुःखितः कृपणः किं अवदत्?

**2. एषां अन्तं, लिङ्गं, विभक्तिं, वचनं च लिखत—**

(१) ताम्रभाजने (२) नदीम् (३) नद्याः

(४) सिकताभिः (५) लोकः

**3. सन्धिं विभज्य नाम लिखत—**

(१) निक्षिप्यारक्षत् (२) सर्वेऽपि

(३) एकैकम् (४) प्रत्यागच्छत्

**4. एतानि वाक्ये योजयत—**

(१) रहसि (२) उषसि (३) समाप्य

(४) अन्वेष्टुम् (५) नष्टम्

**5. वाक्यदोषान् समीकुरुत—**

(१) तेन एकं उपायः चिन्तितः ।

(२) ततः सः स्नानार्थं अगच्छन् ।

(३) नदीतीरं सैकतलिङ्गानां युक्तं आसीत् ।

(४) अहं तं पुरुषं पश्यसि ।

**6. संयोज्य लिखत—**

| | अ | आ |
|---|---|---|
| (१) | वित्तम् | लीलया |
| (२) | नदी | अधिकम् |
| (३) | प्रभूतम् | आपणः |
| (४) | उषःकाले | धनम् |
| (५) | अनायासेन | सायंकाले |
| | | प्रातःकाले |

**ಶಬ್ದಾರ್ಥ**

कृपणः=ಜಿಪುಣ, ताम्रभाजनम्=ತಾಮ್ರಪಾತ್ರೆ, सिकताः= ಮರಳು, गर्तः=ಹಳ್ಳ, ಗುಂಡಿ, पारमार्थिकः=ನಿಜವಾದುದನ್ನು ಅರಿಯುವವ.

---

द्वादशः पाठः

# न स्वभावः परिवर्तते

कस्मिंश्चित् आश्रमे दयानिधिः नाम मुनिः आसीत्। सः अधीतशास्त्रः तपोनिष्ठः च आसीत्। प्रतिदिनं सः फलपुष्पाणि आहर्तुं वनं गच्छति स्म।

एकदा सः वने काकस्य मुखात् पतितां मूषिकां अपश्यत्। दयालुः सः तां मूषिकां आश्रमं अनयत्। औषधेन उपाचरत्। ततः प्रभृति आहारं पानीयं च दत्वा तां अपालयत्। सा मूषिका तस्याश्रमे इच्छानुसारेण सञ्चरन्ती सुखेन वसति स्म।

कदाचित् काचन बिडाली मूषिकां अपश्यत्। अथ बिडाली तां हन्तुं अन्वधावत्। तत्र उपविष्टः तापसः अनुधावन्तीं बिडालीं अपश्यत्। मूषिकां रक्षितुं, तां

बिडालीमेव कर्तुं ऐच्छत्। अवदत् च– "हे मूषिके, त्वं बिडाली भव" इति। तत्क्षणं तस्य वचनेन मूषिका बिडाली अभवत्। एतां दृष्ट्वा अन्या बिडाली भयेन अधावत्।

अन्यस्मिन् दिने काचन सारमेयी बिडालीं भक्षयितुं आगच्छत्। मुनिः तद्दृष्ट्वा बिडाल्याः रक्षणाय अवदत्– "हे बिडालि! त्वं शुनी भव" इति। तत्क्षणं बिडाली शुनी अभवत्। सारमेयी तां दृष्ट्वा भयेन अधावत्।

अथ काचन व्याघ्री शुनीं भक्षयितुं अन्वधावत्। पुनः सः ऋषिः शुनीं रक्षितुं इच्छन् अवदत् – "शुनि! त्वं व्याघ्री भव" इति। तस्य प्रभावेण शुनी व्याघ्री अभवत् एव। तां व्याघ्रीं वीक्ष्य अन्या व्याघ्री भयेन प्रतिन्यवर्तत। एवं मुनेः प्रभावेण सा मूषिका क्रमेण बिडाली, शुनी, व्याघ्री चाभवत्।

अथ कदाचित् व्याघ्री भूता सा मुनिं एव भक्षयितुं ऐच्छत्। मुनिस्तु स्वसामर्थ्येन तस्याः आशयं ज्ञात्वा व्याघ्रीं अशपत्। "त्वं पुनः मूषिका भव" इति।

अत एव प्राज्ञाः वदन्ति–

"न स्वभावः परिवर्तते" इति।

## अभ्यासः

1. **संस्कृतभाषया उत्तरं लिखत –**

(१) दयानिधिः कीदृशः आसीत्? (२) प्रतिदिनं दयानिधिः किमर्थं वनं गच्छति स्म? (३) सः मुनिः वने किम् अपश्यत्? (४) दयालुः दयानिधिः मूषिकां केन उपाचरत्? (५) मुनिः दयानिधिः मूषिकां किमर्थं बिडाली अकरोत्? (६) व्याघ्रीभूता मूषिका किं ऐच्छत्? (७) ऋषिः व्याघ्रीं किमिति अशपत्?

2. **सन्धिं विभज्य सन्धिनाम लिखत –**

(१) तस्याश्रमे (२) इच्छानुसारेण (३) चाभवत्

3. **इतरवचनद्वयं लिखत –**

(१) काकस्य (२) आश्रमे (३) वचनेन
(४) बिडाल्याः (५) मुनेः

4. **एतानि वाक्ये योजयत –**

(१) आहर्तुम् (२) दत्वा (३) तत्र
(४) तत्क्षणम् (५) भयेन (६) ज्ञात्वा

5. **पुल्लिङ्गरूपाणि लिखत –**

(१) बिडाली (२) मूषिका (३) व्याघ्री (४) . सारमेयी

6. **एतानि पुरुषत्रये लिखत –**

(१) अपश्यत् (२) भव (३) अवर्तत (४) परिवर्तते

7. **पर्यायशब्दान् लिखत –**

(१) वनम् (२) मूषकः (३) तापसः (४) प्राज्ञः
(५) मुखम् (६) बिडालः (७) व्याघ्रः

8. "न स्वभावः परिवर्तते" इत्युक्तिं सोदाहरणं मातृभाषया विशदयत ।

त्रयोदशः पाठः

# सुभाषितानि

(शोभनं भाषितं=सुभाषितम्, ಅಂದರೆ ಉತ್ತಮ ಅಥವಾ ಒಳ್ಳೆಯ ಮಾತು. ಇದನ್ನು सूक्तिः, सदुक्तिः, सुवचनम् ಎಂತಲೂ ಕರೆಯುತ್ತಾರೆ. ಈ ಮಾತುಗಳು ಮಾನವನನ್ನು ಸನ್ಮಾರ್ಗದ ಕಡೆಗೆ ಕೊಂಡೊಯ್ಯುತ್ತವೆ. ಇದು ಒಳ್ಳೆಯದು, ಇದು ಕೆಟ್ಟದ್ದು, ಇದನ್ನು ಮಾಡು, ಇದನ್ನು ಮಾಡಬೇಡ, ಇದರಿಂದ ಯಶಸ್ಸು, ಇದರಿಂದ ಕಳಂಕ ಇತ್ಯಾದಿ ವಿಷಯಗಳನ್ನೂ ತಿಳಿಸುತ್ತವೆ. ಆದ್ದರಿಂದ ಇಂತಹ ಸುಭಾಷಿತಗಳನ್ನು ಸನ್ಮಾರ್ಗ ದರ್ಶಕದೀಪಗಳೆಂದು ಹೇಳುತ್ತಾರೆ. ಇಲ್ಲಿ ಕೆಲವು ಸುಭಾಷಿತ ಗಳನ್ನು ಕೊಡಲಾಗಿದೆ.

(कण्ठपाठः करणीयः)

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता ॥ १ ॥

अफलानि दुरन्तानि समव्ययफलानि च ।
अशक्यानि च कार्याणि नारभेत विचक्षणः ॥ २ ॥

कर्ता कारयिता चैव प्रेरकश्चानुमोदकः ।
सुकृते दुष्कृते चैव चत्वारः समभागिनः ॥ ३ ॥

विना कार्येण ये मूढाः गच्छन्ति परमन्दिरम् ।
अवश्यं लघुतां यान्ति कृष्णपक्षे यथा शशी ॥ ४ ॥

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः।
परलोके धनं धर्मः शीलं सर्वत्र वै धनम् ॥ ५ ॥

विद्या ददाति विनयं विनयाद्याति पात्रताम्।
पात्रत्वात् धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥ ६ ॥

पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवाः।
न पापफलमिच्छन्ति पापं कुर्वन्ति यत्नतः ॥ ७ ॥

येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुविभारभूताः
मनुष्यरूपेण मृगाश्चरन्ति ॥ ८ ॥

सम्पूर्णकुम्भो न करोति शब्द-
मर्धो घटो घोषमुपैति नूनम्।
विद्वान्कुलीनो न करोति गर्वं
गुणैर्विहीनाः बहु जल्पयन्ति ॥ ९ ॥

न चोरहार्यं न च राजहार्यं
न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनप्रधानम् ॥ १० ॥

## अभ्यासः

1. **संस्कृतभाषया उत्तरं लिखत—**

(१) जन्तवः केन तुष्यन्ति ? (२) विचक्षणः कीदृशानि कार्याणि नारभेत ? (३) चत्वारः समभागिनः के ? के ? (४) मूढाः कथं लघुतां यान्ति ? (५) किं सर्वत्र धनम् ? (६) विद्या किं ददाति ? (७) मानवाः किम् इच्छान्ति ? किं नेच्छन्ति ? (८) कीदृशाः भुविभारभूताः मनुष्यरूपेण चरन्ति ? (९) के बहु जल्पयन्ति ? (१०) कः गर्वं न करोति ?

2. **रिक्तस्थानानि पूरयत—**

(१) विदेशेषु धनं — — ।

(२) विनयाद्याति _ _ ।

(३) मनुष्यरूपेण _ _ चरन्ति ।

(४) विद्या धनं _ _ प्रधानम् ।

3. **इमानि वाक्ये योजयत—**

(१) कार्याणि (२) चत्वारि (३) विना (४) अवश्यम्
(५) सर्वत्र (६) यत्नतः (७) नूनम् (८) नित्यम्

4. **विरूद्धार्थकं पदं लिखत—**

(१) सुकृतम् (२) सुखम् (३) पुण्यम्
(४) धर्मः (५) वर्धते

5. **पर्यायशब्दान् लिखत—**

(१) विचक्षणः (२) शशी (३) मतिः
(४) मानवः (५) कुम्भः (६) चोरः

6. सन्धिं विभज्य नाम लिखत—

(१) नारभेत (२) नेच्छन्ति (३) चैव

7. एषां अन्तं, लिङ्गं, विभक्तिं, वचनं च लिखत—

(१) वचने (२) कर्ता (३) विदेशेषु (४) विनयात्
(५) येषाम् (६) मृगाः (७) गुणैः (८) पुण्यस्य

8. क्रियापदानां रूपाणि पुरुषत्रये लिखत—

(१) तुष्यन्ति ९२) यान्ति (३) इच्छन्ति
(४) चरन्ति (५) वर्धते

**ಶಬ್ದಾರ್ಥ**

दरिद्रता=ಬಡತನ, दुरन्तानि=ಕಡೆಯಲ್ಲಿ ದುಃಖ ನೀಡುವ, समव्ययफलानि= ಲಾಭನಷ್ಟಗಳಲ್ಲಿ ಸಮವಾದ, विचक्षणः= ಪಂಡಿತ, अनुमोदकः=ಒಪ್ಪಿಗೆ ನೀಡುವವನು, पात्रताम्= ಅರ್ಹತೆಯನ್ನು, यत्नतः=ಪ್ರಯತ್ನ ಪೂರ್ವಕವಾಗಿ, घोषम्= ಶಬ್ದವನ್ನು, जल्पयन्ति=ಮಾತನಾಡುತ್ತಾರೆ.

चतुर्दशः पाठः

# मारुतेः वाक्कौशलम्

ಈ ಭಾಗವನ್ನು ಶ್ರೀಮದ್ರಾಮಾಯಣದ ಕಿಷ್ಕಿಂಧಾಕಾಂಡದ ಮೂರನೇ ಸರ್ಗದಿಂದ ಆರಿಸಲಾಗಿದೆ.

ಸುಗ್ರೀವನ ಸೂಚನೆಯಂತೆ ಹನುಮಂತನು ಭಿಕ್ಷುರೂಪದಿಂದ ಬಂದು ರಾಮಲಕ್ಷ್ಮಣರನ್ನು ಭೇಟಿ ಮಾಡುವನು. ಆ ಸಮಯದಲ್ಲಿ ಅವನು ಆಡಿದ ಸುಸಂಸ್ಕೃತವೂ ನಿರ್ದುಷ್ಟವೂ ಆದ ಮಾತುಗಳನ್ನು ಕೇಳಿದ ಶ್ರೀರಾಮನು ಮಾರುತಿಯನ್ನು ಮನಸಾರೆ ಕೊಂಡಾಡುವನು.

सुग्रीवो नाम धर्मात्मा कश्चिद्वानरपुङ्गवः ।
वीरो विनिकृतो भ्रात्रा जगद्भ्रमति दुःखितः ॥ १ ॥

प्राप्तोऽहं प्रेषितस्तेन सुग्रीवेण महात्मना ।
राज्ञा वानरमुख्यानां हनूमान् नाम वानरः ॥ २ ॥

युवाभ्यां स हि धर्मात्मा सुग्रीवः सख्यमिच्छति ।
तस्य मां सचिवं वित्तं वानरं पवनात्मजम् ॥ ३ ॥

एतच्छ्रुत्वा वचस्तस्य रामो लक्ष्मणमब्रवीत् ।
सचिवोऽयं कपीन्द्रस्य सुग्रीवस्य महात्मनः ॥ ४ ॥
तमेव काङ्क्षमाणस्य ममान्तिकमिहागतः ।
अभिभाषस्व सौमित्रे सुग्रीवसचिवं कपिम् ॥ ५ ॥

नानृग्वेदविनीतस्य नायजुर्वेदधारिणः ।
नासामवेदविदुषः शक्यमेवं प्रभाषितुम् ॥ ६ ॥

नूनं व्याकरणं कृत्स्नं अनेन बहुधा श्रुतम्।
बहु व्याहरतानेन न किञ्चिदपशब्दितम् ॥ ७ ॥

न मुखे नेत्रयोश्चापि ललाटे च भ्रुवोस्तथा।
अन्येष्वपि च गात्रेषु दोषः संविदितः क्वचित् ॥ ८ ॥

संस्कारक्रमसम्पन्नां अद्भुतामविलम्बिताम्।
उच्चारयति कल्याणीं वाचं हृदयहारिणीम् ॥ ९ ॥

अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया।
कस्य नाराध्यते चित्तं उद्यतासेररेरपि ॥ १० ॥

एवं गुणगणैर्युक्ताः यस्य स्युः कार्यसाधकाः।
तस्य सिद्ध्यन्ति सर्वेऽर्थाः दूतवाक्यप्रचोदिताः ११ ॥

## अभ्यासः

1. संस्कृतभाषया उत्तरं लिखत—

(१) अयं भागः कस्मात् ग्रन्थात् उद्धृतः? (२) सुग्रीवः कः? सः कीदृशः? (३) सुग्रीवसचिवः कः? (४) रामः कं कांक्षमाणः आसीत्? (५) सुग्रीवः काभ्यां सह सख्यमिच्छति? (६) सुग्रीवस्य भ्राता कः? (७) त्रिस्थानानि कानि? (८) हनूमान् कीदृशीं वाचं उच्चारयति इति रामः वदति?

2. अधोलिखितानां पदानां अन्तं, लिङ्गं, विभक्तिं, वचनं च लिखत—

| | | |
|---|---|---|
| (१) भ्राता | (२) युवाभ्याम् | (३) वानरम् |
| (४) कपीन्द्रस्य | (५) मुखे | (६) अनया |
| (७) यस्य | (८) कल्याणीम् | |

3. **पर्यायशब्दान् लिखत—**

(१) कपिः (२) सचिवः (३) राजा
(४) मुखम् (५) कृत्स्नम् (६) असिः

4. **सन्धिं विभज्य सन्धिनाम लिखत—**

(१) प्राप्तोऽहम् (२) पवनात्मजम् (३) व्यवहरतानेन
(४) अन्येष्वपि (५) नाराध्यते (६) सर्वेऽर्थाः

5. **एतानि पदानि वाक्ये योजयत—**

(१) धर्मात्मा (२) सचिवः (३) अन्तिकम्
(४) प्रभाषितुम् (५) दोषः (६) अरेः

6. **ससन्दर्भं मातृभाषया विवृणुत—**

(१) तस्य मां सचिवं वित्तं वानरं पवनात्मजम् ।

(२) सचिवोऽयं कपीन्द्रस्य सुग्रीवस्य महात्मनः ।

(३) बहु व्याहरतानेन न किञ्चिदपशब्दितम् ।

7. **एषां लकारं, पुरुषं, वचनं च लिखत—**

(१) अब्रवीत् (२) आराध्यते (३) भाषस्व (४) भ्रमति

8. **मातृभाषया उत्तरं लिखत—**

(१) मारुतेः वचनवैखरीं वर्णयत ।

(२) मारुतिः आत्मानं कथं परिचाययति ?

(३) दूतस्य लक्षणं किम् ? विशदयत ।

(४) कीदृशं वचनं प्रियं मनोहारि च ?

## ಶಬ್ದಾರ್ಥ

पुङ्गवः=ಶ್ರೇಷ್ಠ, विनिकृतः=ತ್ಯಜಿಸಲ್ಪಟ್ಟವನಾಗಿ, वित्तम्=ತಿಳಿಯಿರಿ (ಕ್ರಿಯಾಪದ), एतत्+श्रुत्वा=ಇದನ್ನು ಕೇಳಿ, काङ्क्षमाणस्य=ಬಯಸುತ್ತಿರುವ अन्तिकम्=ಸಮೀಪ, अभि-भाषस्व=ಮಾತನಾಡು, अनृग्वेदविनीतस्य=ಋಗ್ವೇದಾಧ್ಯ-ಯನವನ್ನು ಮಾಡದಿರುವವನಿಗೆ, अयजुर्वेदधारिणः= ಯಜುರ್ವೇದವನ್ನು ಅಭ್ಯಾಸ ಮಾಡದಿರುವವನಿಗೆ, असामवेदविदुषः = ಸಾಮವೇದದಲ್ಲಿ ಪಾಂಡಿತ್ಯವನ್ನು ಗಳಿಸದಿರುವವನಿಗೆ, कृत्स्नम् =ಸಂಪೂರ್ಣವಾದ, बहुधा=ಅನೇಕಸಾರಿ, व्याहरता=ಮಾತನಾಡುತ್ತಿರುವ, गात्रेषु=ಅವಯವಗಳಲ್ಲಿ, ललाटे=ಹಣೆಯಲ್ಲಿ, भ्रुवोः=ಹುಬ್ಬುಗಳಲ್ಲಿ, अविलम्बिताम् =ಬಹಳ ನಿಧಾನವಲ್ಲದ, कल्याणीम् = ಶುಭಕರವಾದ, चित्रया=ಆಶ್ಚರ್ಯಕರವಾದ, त्रिस्थानव्यञ्जनस्थया = ಎದೆ, ಕಂಠ, ಶಿರಸ್ಸುಗಳಲ್ಲಿ ಸ್ಫುಟವಾಗಿ ಬರುವ, अर्थाः= ಕಾರ್ಯಗಳು, उद्यतासेः= ಎತ್ತಿದ ಖಡ್ಗವುಳ್ಳ, कार्यसाधकाः= ಕೆಲಸವನ್ನು ಚೊಕ್ಕದಾಗಿ ಮಾಡುವ ಸೇವಕರು, अद्रुताम् = ಬಹಳ ವೇಗವಲ್ಲದ.

---

### पञ्चदशः पाठः

# लोकोक्तयः

### (ಕಂಠಪಾಠಕ್ಕೆ)

१. न निश्चितार्थाद्विरमन्ति धीराः ।
ಧೀರರು ತಾವು ನಿಶ್ಚಯಿಸಿದ ಕಾರ್ಯವನ್ನು ಬಿಡುವುದಿಲ್ಲ.

२. सहसा विदधीत न क्रियाम् ।
ಆತುರದಿಂದ (ವಿಚಾರ ಮಾಡದೆ) ಕೆಲಸವನ್ನು ಮಾಡಬಾರದು.

३. हितं मनोहारि च दुर्लभं वचः ।
ಹಿತವೂ ಮನೋಹರವೂ ಆದ ಮಾತು ಅಪರೂಪ.

४. अङ्गीकृतं सुकृतिनो न परित्यजन्ति ।
ಪುಣ್ಯಾತ್ಮರು ತಾವು ಒಪ್ಪಿಕೊಂಡ ಕಾರ್ಯವನ್ನು ಎಂದಿಗೂ ಬಿಡುವುದಿಲ್ಲ.

५. न वंशवृक्षेषु फलन्ति द्राक्षाः ।
ಬಿದಿರು ಮೆಳೆಗಳಲ್ಲಿ ದ್ರಾಕ್ಷಿಹಣ್ಣು ಬಿಡುವುದಿಲ್ಲ.

६. अग्निदाहादपि विशिष्टं वाक्पारुष्यम् ।
ಬಿರುನುಡಿಯು ಬೆಂಕಿಯ ಕಾವಿಗಿಂತಲೂ ಹೆಚ್ಚು ಭಯಂಕರ.

७. अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति ।
ತಪ್ಪುದಾರಿಯಲ್ಲಿ ಹೋಗುತ್ತಿರುವವನನ್ನು ಸೋದರನೂ
ಸಹ ತ್ಯಜಿಸುತ್ತಾನೆ.

८. अवयवशक्तेः समुदायशक्तिर्बलीयसी ।
ವ್ಯಕ್ತಿಶಕ್ತಿಗಿಂತ ಸಾಮೂಹಿಕ ಶಕ್ತಿಯು ಬಲಿಷ್ಠವಾದದ್ದು.

९. चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च ।
ಸುಖದುಃಖಗಳು ಚಕ್ರದಂತೆ ಉರುಳುತ್ತಿರುತ್ತವೆ.

१०. गतः कालो न पुनरायाति ।
ಕಳೆದುಹೋದ ಕಾಲವು ಮತ್ತೆ ಬರುವುದಿಲ್ಲ.

# व्याकरणविभागः

## सन्धिः

1. यण्सन्धिः

**ನಿಯಮ** — इ ई उ ऊ ऋ ॠ ಗಳಿಗೆ ಅಸವರ್ಣ ಸ್ವರವು ಪರವಾದರೆ इ ई ಕಾರಗಳ ಸ್ಥಾನದಲ್ಲಿ य ಕಾರವೂ, उ ऊ ಕಾರಗಳ ಸ್ಥಾನದಲ್ಲಿ व ಕಾರವೂ, ऋ ॠ ಕಾರಗಳ ಸ್ಥಾನದಲ್ಲಿ र ಕಾರವೂ (ರೇಫವು) ಆದೇಶವಾಗಿ ಬರುತ್ತವೆ.

ಉದಾ.— इति + अत्र = इत्यत्र।
मनु + अन्तरम् = मन्वन्तरम्।
पितृ + आज्ञा = पित्राज्ञा।

2. यान्तवान्तादेशसन्धिः

**ನಿಯಮ** — ए ऐ ओ औ ಕಾರಗಳಿಗೆ ಸ್ವರವು ಪರವಾದರೆ ಕ್ರಮವಾಗಿ अय्, आय्, अव्, आव् ಗಳು ಆದೇಶವಾಗಿ ಬರುತ್ತವೆ.

ಉದಾ.— हरे + ए = हरये ; नै + अकः = नायकः
गुरो + ए = गुरवे; पौ + अकः = पावकः

3. पूर्वरूपसन्धिः

**ನಿಯಮ** — ಪದದ ಕೊನೆಯಲ್ಲಿರುವ ए ಅಥವಾ ओ ಕಾರದ ಮುಂದೆ अ ಕಾರವು ಬಂದರೆ ಆ अ ಕಾರವು ಅದರ ಹಿಂದಿನ ए ಅಥವಾ ओ ಕಾರದೊಡನೆ ಸೇರಿಕೊಳ್ಳುವುದು.

ಉದಾ. — अन्ते + अपि = अन्तेऽपि
हरे + अव = हरेऽव
सो + अयम् = सोऽयम्
रामो + अवदत् = रामोऽवदत्

### अभ्यासः

1. सन्धि कुरुत—

   यदि + अपि, साधु + इदम्, मातृ + आदेशः, तौ + उभौ, हरौ + इव, शम्भो + ए, यते + ए, ननु + अहम्, नृपो + अपि, रामो + अपि, को + अपि, विप्रो + अपठत्

2. सन्धि विगृह्य वदत—

   न्विदम्, मुन्याश्रमः, पित्रार्जितम्, विष्णवे, द्वावपि, असावेव, स्थाण्वाश्रमः, मात्रनुमतिः एतेऽपि, केऽत्र, नरोऽयम्, गजोऽयम्, मृगोऽयम्

### ವಿಶೇಷ ಕ್ರಿಯಾಪದ

#### लट् – परस्मैपदम्

| | | | |
|---|---|---|---|
| उत् + एति = | उदेति | उदितः | उद्यन्ति |
| | उदेषि | उदिथः | उदिथ |
| | उदेमि | उदिवः | उदिमः |

#### लट् – आत्मनेपदम्

| | | | |
|---|---|---|---|
| उप + आस्ते = | उपास्ते | उपासाते | उपासते |
| | उपास्से | उपासाथे | उपाध्वे |
| | उपासे | उपास्वहे | उपास्महे |

### ಭೂತಕೃದಂತಾವ್ಯಯ

ಧಾತುವಿಗೆ त्वा (क्त्वा) ಎಂಬ ಪ್ರತ್ಯಯವನ್ನು ಸೇರಿಸಿದರೆ ಭೂತಕಾಲಿಕ ಕೃದಂತಾವ್ಯಯವಾಗುತ್ತದೆ.

ಉದಾ — धृ + त्वा = धृत्वा, पा + त्वा = पीत्वा
भुज् + त्वा = भुक्त्वा, रक्ष + त्वा = रक्षित्वा

ಧಾತುವಿಗೆ ಉಪಸರ್ಗವು ಸೇರಿದ್ದರೆ **त्वा** ಕ್ಕೆ ಬದಲಾಗಿ **य (ल्यप्)** ಎಂಬ ಪ್ರತ್ಯಯವು ಆದೇಶವಾಗಿ ಬರುತ್ತದೆ.

**दा + त्वा = दत्वा, आ + दा + य = आदाय**

**गम् + त्वा = गत्वा, आ + गम् + य = आगम्य, आगत्य**

**जि + त्वा = जित्वा, वि + जि + य = विजित्य**

ಧಾತುವಿಗೆ ಪ್ರತ್ಯಯಗಳನ್ನು ಸೇರಿಸಿದಾಗ ಮೇಲೆ ಕಾಣಿಸಿದಂತೆ ಕೆಲವು ವ್ಯತ್ಯಾಸಗಳಾಗುತ್ತವೆ.

## उपसर्गः

ಧಾತುವಿಗೆ ಮೊದಲು ಸೇರಿಸುವ **प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आ, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप** ಇವುಗಳಿಗೆ ಉಪಸರ್ಗಗಳೆಂದು ಹೆಸರು. ಇವುಗಳಿಗೆ ಸ್ವತಂತ್ರವಾದ ಅರ್ಥವಿಲ್ಲ. ಆದರೆ ಇವುಗಳನ್ನು ಸೇರಿಸುವುದರಿಂದ ಧಾತುವಿನ ಅರ್ಥವು ವ್ಯತ್ಯಾಸವಾಗುವುದು.

**श्लोक :** **उपसर्गेण धात्वर्थः बलादन्यत्र नीयते ।**
**प्रहाराहारसंहारविहारपरिहारवत् ॥**

ಉದಾ — **गच्छति** = ಹೋಗುತ್ತಾನೆ

आ + गच्छति = आगच्छति ಬರುತ್ತಾನೆ.

अनु + गच्छति = अनुगच्छति ಹಿಂಬಾಲಿಸುತ್ತಾನೆ

अधि + गच्छति = अधिगच्छति ಪಡೆಯುತ್ತಾನೆ

### ವಿಶೇಷ ಕ್ರಿಯಾಪದ

### लट् – ಪರಸ್ಮೈಪದ

| | | | | | |
|---|---|---|---|---|---|
| ददाति | दत्तः | ददति | दोग्धि | दुग्धः | दुहन्ति |
| ददासि | दत्थः | दत्थ | धोक्षि | दुग्धः | दुग्ध |
| ददामि | दद्वः | दद्मः | दोह्मि | दुह्वः | दुह्मः |

# कृदन्ताव्ययम्

ಧಾತುವಿಗೆ **तुम् (तुमुन्)** ಪ್ರತ್ಯಯವು ಸೇರಿದರೆ **तुमुन्नन्ताव्यय**ವಾಗುತ್ತದೆ. ಎರಡು ಕ್ರಿಯೆಗಳಿದ್ದಾಗ ಫಲರೂಪದ ಕ್ರಿಯೆಯನ್ನು ಬೋಧಿಸುವ ಧಾತುವಿನ ಮೇಲೆ ಈ ಪ್ರತ್ಯಯವು ಬರುತ್ತದೆ.

ಉದಾ — **'भोक्तुं गच्छति'** ಇಲ್ಲಿ ಭೋಜನ, ಗಮನ ಎಂಬ ಎರಡು ಕ್ರಿಯೆಗಳುಂಟು. ಗಮನಕ್ಕೆ ಭೋಜನವು ಫಲ, ಆದ್ದರಿಂದ **भुज्** ಧಾತುವಿನ ಮೇಲೆ **तुमुन्** ಪ್ರತ್ಯಯವು ಬಂದಿದೆ

| | |
|---|---|
| **हन् + तुम् = हन्तुम्।** | **युध् + तुम् = योद्धुम्।** |
| **पठ् = तुम् = पठितुम्।** | **जि + तुम् = जेतुम्।** |

---

# क्रियारूपाणि

## आत्मनेपदम् – लट् – ವರ್ತಮಾನಕಾಲ

**धातुः + विकरणप्रत्ययः + आख्यातप्रत्ययः = क्रियापदम्।**

### विकरणप्रत्ययाः

| 1 ನೇ ಗಣ | 4 ನೇ ಗಣ | 6ನೇ ಗಣ | 10ನೇ ಗಣ |
|---|---|---|---|
| **अ** | **य** | **अ** | **अय** |

### अख्यातप्रत्ययाः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथम पुरुषः** | **ते** | **इते** | **अन्ते** |
| **मध्यम पुरुषः** | **से** | **इथे** | **ध्वे** |
| **उत्तम पुरुषः** | **ए** | **वहे** | **महे** |

ಉದಾ. : वन्द् = ವಂದಿಸು

1ನೇ ಗಣ वन्द् + अ + ते = वन्दते

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. पु. | वन्दते | वन्देते | वन्दन्ते |
| म. पु. | वन्दसे | वन्देते | वन्दध्वे |
| उ. पु. | वन्दे | वन्दावहे | वन्दामहे |

मन् = ತಿಳಿ

4ನೇ ಗಣ मन् + य + ते = मन्यते

| | | |
|---|---|---|
| मन्यते | मन्येते | मन्यन्ते |
| मन्यसे | मन्येथे | मन्यध्वे |
| मन्ये | मन्यावहे | मन्यामहे |

लज्ज् = ನಾಚಿಕೆಪಡು

6ನೇ ಗಣ लज्ज् + अ + ते = लज्जते

| | | |
|---|---|---|
| लज्जते | लज्जेते | लज्जन्ते |
| लज्जसे | लज्जेथे | लज्जध्वे |
| लज्जे | लज्जावहे | लज्जामहे |

मृग् = ಹುಡುಕು

10ನೇ ಗಣ मृग् + अय + ते = मृगयते

| | | |
|---|---|---|
| मृगयते | मृगयेते | मृगयन्ते |
| मृगयसे | मृगयेथे | मृगयध्वे |
| मृगये | मृगयावहे | मृगयामहे |

ವಿ. ಸೂ. : ಪ್ರಥಮ ಪುರುಷ ಬಹುವಚನ ಮತ್ತು ಉತ್ತಮ ಪುರುಷದಲ್ಲಿ ಆಗುವ ವ್ಯತ್ಯಾಸಗಳನ್ನು ಪರಸ್ಮೈಪದಿಯಂತೆ ಗಮನಿಸಬೇಕು.

## लोट् = ಆಜ್ಞಾರ್ಥ

ಪರಸ್ಮೈಪದ–ಆಖ್ಯಾತಪ್ರತ್ಯಯಗಳು

| | | |
|---|---|---|
| तु, तात् | ताम् | अन्तु |
| (हि) ,तात् | तम् | त |
| आनि | आव | आम |

ಒಂದನೇ ಗಣ पठ् = ಧಾತು

| | | |
|---|---|---|
| पठतु, पठतात् | पठताम् | पठन्तु |
| पठ, पठतात् | पठतम् | पठत |
| पठानि | पठाव | पठाम |

ಆತ್ಮನೇಪದ–ಆಖ್ಯಾತ ಪ್ರತ್ಯಯಗಳು

| | | |
|---|---|---|
| ताम् | इताम् | अन्ताम् |
| स्व | इथाम् | ध्वम् |
| ऐ | आवहै | आमहै |

ಒಂದನೇ ಗಣ लभ् = ಧಾತು

| | | |
|---|---|---|
| लभताम् | लभेताम् | लभन्ताम् |
| लभस्व | लभेथाम् | लभध्वम् |
| लभै | लभावहै | लभामहै |

ಹೀಗೆಯೇ 4, 6 ಮತ್ತು 10ನೇ ಗಣದ ಧಾತುಗಳ ಕ್ರಿಯಾರೂಪಗಳನ್ನು ತಿಳಿಯಬೇಕು. ಲೋಟ್ ಲಕಾರದಲ್ಲಿ ಅಕಾರದ ಮುಂದಿರುವ हि ಪ್ರತ್ಯಯವು ಲೋಪವಾಗುತ್ತದೆ.

## ವಿಶೇಷ ಕ್ರಿಯಾಪದ

### अस्—ಧಾತು = ಇರು

| | | |
|---|---|---|
| अस्तु, स्तात् | स्ताम् | सन्तु |
| एधि, स्तात् | स्तम् | स्त |
| असानि | असाव | असाम |

### कृ—धातु = ಮಾಡು

| | | |
|---|---|---|
| करोतु, कुरुतात् | कुरुताम् | कुर्वन्तु |
| कुरु, कुरुतात् | कुरुतम् | कुरुत |
| करवाणि | करवाव | करवाम |

---

### लङ् =ಅನದ್ಯತನ ಭೂತಕಾಲ

लङ् ಲಕಾರವು ಕೆಲಸವು ಹಿಂದೆ ನಡೆದುದನ್ನು ಸೂಚಿಸುವುದು. ಧಾತುವಿಗೆ ಆಯಾಯ ಗಣದ ವಿಕರಣ ಪ್ರತ್ಯಯವನ್ನೂ, ಆಖ್ಯಾತ ಪ್ರತ್ಯಯವನ್ನೂ ಸೇರಿಸಿ, ಧಾತುವಿನ ಮೊದಲು अ ಎಂಬ ಆಗಮವನ್ನು ಸೇರಿಸಿದರೆ लङ् ಲಕಾರದ ಕ್ರಿಯಾರೂಪವಾಗುತ್ತದೆ. ಹೀಗೆ ರೂಪಗಳನ್ನು ಸಿದ್ಧಪಡಿಸುವಾಗ ಆಗುವ ಸಂಧಿ ಕಾರ್ಯಗಳನ್ನು ಗಮನಿಸಬೇಕು

**अ + धातु + विकरण + आख्यातप्रत्यय = क्रियापदम्।**

ಪರಸ್ಮೈಪದ–ಆಖ್ಯಾತಪ್ರತ್ಯಯಗಳು

| | | |
|---|---|---|
| त् | ताम् | अन् |
| स् | तम् | त |
| म् | व | म |

नम् ಧಾತು अ + नम् + अ + त् = अनमत्

| | | |
|---|---|---|
| अनमत् | अनमताम् | अनमन् |
| अनमः | अनमतम् | अनमत |
| अनमम् | अनमाव | अनमाम |

ಆತ್ಮನೇಪದ–ಆಖ್ಯಾತ ಪ್ರತ್ಯಯಗಳು

| | | |
|---|---|---|
| त | इताम् | अन्त |
| थाः | इथाम् | ध्वम् |
| इ | वहि | महि |

याच् ಧಾತು अ + याच् + अ + त + अयाचत

| | | |
|---|---|---|
| अयाचत | अयाचेताम् | अयाचन्त |
| अयाचथाः | अयाचेथाम् | अयाचध्वम् |
| अयाचे | अयाचावहि | अयाचामहि |

ಹೀಗೆಯೇ 4, 6 ಮತ್ತು 10ನೇ ಗಣದ ಧಾತುಗಳ ಕ್ರಿಯಾರೂಪಗಳನ್ನು ತಿಳಿಯಬೇಕು.

ವಿ. ಸೂ. : – ಧಾತುವಿಗೆ ಉಪಸರ್ಗವು ಸೇರಿದ್ದರೆ अ ಎಂಬ ಆಗಮವು ಧಾತುವಿನ ಆದಿಗೆ ಬರುತ್ತದೆ. ಉಪಸರ್ಗದ ಆದಿಗೆ ಬರುವುದಿಲ್ಲ. ಆಖ್ಯಾತ ಪ್ರತ್ಯಯಗಳನ್ನು ಸೇರಿಸುವಾಗ ಆಗುವ ಸಂಧಿಕಾರ್ಯಗಳನ್ನು ಗಮನಿಸಬೇಕು.

**ಉದಾ.:** वि + अ + सृज् + अ + त् = व्यसृजत्
उत् + अ + तार्(तृ) + अय + त् = उद्तारयत्

## ವಿಶೇಷ ಕ್ರಿಯಾಪದ

### अस् – धातु = ಇರು

| | | |
|---|---|---|
| आसीत् | आस्ताम् | आसन् |
| आसीः | आस्तम् | आस्त |
| आसम् | आस्व | आस्म |

### कृ – धातु = ಮಾಡು

| | | |
|---|---|---|
| अकरोत् | अकुरुताम् | अकुर्वन् |
| अकरोः | अकुरुतम् | अकुरुत |
| अकरवम् | अकुर्व | अकुर्म |

### ब्रू – धातु = ಹೇಳು

| | | |
|---|---|---|
| अब्रवीत् | अब्रूतां | अब्रुवन् |
| अब्रवीः | अब्रूतं | अब्रूत |
| अब्रवम् | अब्रूव | अब्रूम |

### शृ – धातु = ಕೇಳು

| | | |
|---|---|---|
| अशृणोत् | अशृणुतां | अशृण्वन् |
| अशृणोः | अशृणुतं | अशृणुत |
| अशृणवं | अशृण्व | अशृण्म |

# शब्दरूपाणि

## इकारान्तः पुल्लिङ्गः 'पति' शब्दः = ಗಂಡ

| | ए. व. | द्वि. व. | ब. व. |
|---|---|---|---|
| प्र. वि | पतिः | पती | पतयः |
| सं. प्र. वि | हे पते | हे पती | हे पतयः |
| द्वि. वि | पतिम् | पती | पतीन् |
| तृ. वि | पत्या | पतिभ्याम् | पतिभिः |
| च. वि | पत्ये | पतिभ्याम् | पतिभ्यः |
| पं. वि | पत्युः | पतिभ्याम् | पतिभ्यः |
| ष. वि. | पत्युः | पत्योः | पतीनाम् |
| स. वि | पत्यौ | पत्योः | पतिषु |

ಸೂಚನೆ : – सेनापति, श्रीपति, उमापति ಮೊದಲಾದವು हरि ಶಬ್ದದಂತೆಯೇ ನಡೆಯುತ್ತವೆ.

## उकारान्तः पुल्लिङ्गः 'शम्भु' शब्दः = ಈಶ್ವರ

| | ए. | द्वि. | व. |
|---|---|---|---|
| प्र. | शम्भुः | शम्भू | शम्भवः |
| सं. प्र. | हे शम्भो | हे शम्भू | हे शम्भवः |
| द्वि. | शम्भुं | शम्भू | शम्भून् |
| तृ. | शम्भुना | शम्भुभ्यां | शम्भुभिः |
| च. | शम्भवे | शम्भुभ्यां | शम्भुभ्यः |
| पं. | शम्भोः | शम्भुभ्यां | शम्भुभ्यः |
| ष. | शम्भोः | शम्भ्वोः | शम्भूनाम् |
| स. | शम्भौ | शम्भ्वोः | शम्भुषु |

### ऋकारान्तः पुल्लिङ्गः 'पितृ' शब्दः = ತಂದೆ

| | ए. | द्वि. | ब. |
|---|---|---|---|
| प्र. | पिता | पितरौ | पितरः |
| सं. प्र. | हे पितः | हे पितरौ | पितरः |
| द्वि. | पितरं | पितरौ | पितॄन् |
| तृ | पित्रा | पितृभ्यां | पितृभिः |
| च. | पित्रे | पितृभ्यां | पितृभ्यः |
| पं | पितुः | पितृभ्यां | पितृभ्यः |
| ष. | पितुः | पित्रोः | पितॄणाम् |
| स. | पितरि | पित्रोः | पितृषु |

### ऋकारान्तः पुल्लिङ्गः 'धातृ' शब्दः = ಬ್ರಹ್ಮ

| | ए. | द्वि. | ब. |
|---|---|---|---|
| प्र. | धाता | धातारौ | धातारः |
| सं. प्र. | हे धातः | हे धातारौ | हे धातारः |
| द्वि. | धातारं | धातारौ | धातॄन् |
| तृ | धात्रा | धातृभ्यां | धातृभिः |
| च. | धात्रे | धातृभ्यां | धातृभ्यः |
| पं. | धातुः | धातृभ्यां | धातृभ्यः |
| ष. | धातुः | धात्रोः | धातॄणाम् |
| स. | धातरि | धात्रोः | धातृषु |

### इ कारान्तः स्त्रीलिङ्गः 'मति' शब्दः = ಬುದ್ಧಿ

| | ए. | द्वि. | ब. |
|---|---|---|---|
| प्र. | मतिः | मती | मतयः |
| सं. प्र. | हे मते | हे मती | हे मतयः |
| द्वि. | मतिं | मती | मतीः |
| तृ. | मत्या | मतिभ्यां | मतिभिः |
| च. | मत्यै (मतये) | मतिभ्यां | मतिभ्यः |
| पं. | मत्याः (मतेः) | मतिभ्यां | मतिभ्यः |
| ष. | मत्याः (मतेः) | मत्योः | मतीनाम् |
| स. | मत्यां (मतौ) | मत्योः | मतिषु |

### ई कारान्तः स्त्रीलिङ्गः 'लक्ष्मी' शब्दः = ಲಕ್ಷ್ಮಿ

| | ए. व | द्वि. व | ब. व |
|---|---|---|---|
| प्र. वि | लक्ष्मीः | लक्ष्म्यौ | लक्ष्म्यः |
| सं. प्र. वि | हे लक्ष्मि | हे लक्ष्म्यौ | हे लक्ष्म्यः |
| द्वि. वि. | लक्ष्मीम् | लक्ष्म्यौ | लक्ष्मीः |
| तृ. वि. | लक्ष्म्या | लक्ष्मीभ्याम् | लक्ष्मीभिः |
| च. वि. | लक्ष्म्यै | लक्ष्मीभ्याम् | लक्ष्मीभ्यः |
| पं. वि. | लक्ष्म्याः | लक्ष्मीभ्याम् | लक्ष्मीभ्यः |
| ष. वि. | लक्ष्म्याः | लक्ष्म्योः | लक्ष्मीणाम् |
| स. वि. | लक्ष्म्याम् | लक्ष्म्योः | लक्ष्मीषु |

## उकारान्त स्त्रीलिङ्गः 'धेनु' शब्दः = ಹಸು

| | ए. | द्वि. | ब. |
|---|---|---|---|
| प्र. | धेनुः | धेनू | धेनवः |
| सं. प्र. | हे धेनो | हे धेनू | हे धेनवः |
| द्वि. | धेनुम् | धेनू | धेनूः |
| तृ. | धेन्वा | धेनुभ्यां | धेनुभिः |
| च. | धेन्वै (धेनवे) | धेनुभ्यां | धेनुभ्यः |
| पं. | धेन्वाः (धेनोः) | धेनुभ्यां | धेनुभ्यः |
| ष. | धेन्वाः (धेनोः) | धेन्वोः | धेनूनाम् |
| स. | धेन्वां (धेनौ) | धेन्वोः | धेनुषु |

## ऋकारान्तः स्त्रीलिङ्गः 'मातृ' शब्दः = ತಾಯಿ

| | ए. | द्वि. | ब. |
|---|---|---|---|
| प्र. | माता | मातरौ | मातरः |
| सं. प्र. | हे मातः | हे मातरौ | हे मातरः |
| द्वि. | मातरं | मातरौ | मातॄः |
| तृ. | मात्रा | मातृभ्यां | मातृभिः |
| च. | मात्रे | मातृभ्यां | मातृभ्यः |
| पं. | मातुः | मातृभ्यां | मातृभ्यः |
| ष. | मातुः | मात्रोः | मातॄणाम् |
| स. | मातरि | मात्रोः | मातृषु |

ओकारान्तः उभयलिङ्गः 'गो' शब्दः = ಹಸು, ಎತ್ತು

| | ए. | द्वि. | ब. |
|---|---|---|---|
| प्र. | गौः | गावौ | गावः |
| सं. प्र. | हे गौः | हे गावौ | हे गावः |
| द्वि. | गाम् | गावौ | गाः |
| तृ. | गवा | गोभ्याम् | गोभिः |
| च. | गवे | गोभ्याम् | गोभ्यः |
| पं. | गोः | गोभ्याम् | गोभ्यः |
| ष. | गोः | गवोः | गवाम् |
| स. | गवि | गवोः | गोषु |

इकारान्त नपुंसकलिङ्गः 'वारि' शब्दः = ನೀರು

| | ए. | द्वि. | ब. |
|---|---|---|---|
| प्र. | वारि | वारिणी | वारीणि |
| सं. प्र. | हे वारे, हे वारि | हे वारिणी | हे वारीणि |
| द्वि. | वारि | वारिणी | वारीणि |
| तृ. | वारिणा | वारिभ्याम् | वारिभिः |
| च. | वारिणे | वारिभ्याम् | वारिभ्यः |
| पं. | वारिणः | वारिभ्याम् | वारिभ्यः |
| ष. | वारिणः | वारिणोः | वारीणाम् |
| स. | वारिणि | वारिणोः | वारिषु |

# षष्टिसंवत्सराः

## (60 ಸಂವತ್ಸರಗಳು)

### (ಕಂಠಪಾಠ ಮಾಡಿರಿ)

प्रभवो विभवः शुक्लः प्रमोदूतः प्रजापतिः ।
आङ्गिरः श्रीमुखो भावो युवो धातुस्तथेश्वरः ॥ 1 ॥

बहुधान्यः प्रमाथी च विक्रमो विषुवत्सरः ।
चित्रभानुः स्वभानुश्च तारणः प्रार्थिवो व्ययः ॥ 2 ॥

सर्वजित्सर्वधारी च विरोधी विकृतिः खरः ।
नन्दनो विजयश्चैव जयो मन्मथदुर्मुखौ ॥ 3 ॥

हेविलम्बो विलम्बश्च विकारी शार्वरिः प्लवः ।
शुभकृत् शोभकृत् क्रोधी विश्वावसुपराभवौ ॥ 4 ॥

प्लवङ्गः कीलकः सौम्यः साधारणविरोधिकृत् ।
परीधावी प्रमादीचः आनन्दः राक्षसो नलः ॥ 5 ॥

पिङ्गलः कालयुक्तिश्च सिद्धार्थी रौद्रदुर्मती ।
दुन्दुभिः रुधिरोद्गारी रक्ताक्षी क्रोधनोऽक्षयः ॥ 6 ॥

# द्वितीया परीक्षा

## मार्गदर्शिनी प्रश्नपत्रिका उत्तरलेखनक्रमश्च

ಈ ಮಾದರಿ ಪ್ರಶ್ನಪತ್ರಿಕೆಯ ಆಧಾರದ ಮೇಲೆ ಪ್ರತಿ ಪರೀಕ್ಷೆಯಲ್ಲಿಯೂ ಪ್ರಶ್ನಪತ್ರಿಕೆಯನ್ನು ರಚಿಸಬೇಕು.

ಇಲ್ಲಿ ಪ್ರತಿ ಮುಖ್ಯಪ್ರಶ್ನೆಗೂ ಉತ್ತರ ಬರೆಯುವ ಕ್ರಮವನ್ನು ತಿಳಿಸಲಾಗಿದೆ. ವಿದ್ಯಾರ್ಥಿಗಳು ಈ ಕ್ರಮವನ್ನು ಅನುಸರಿಸಬೇಕು.

**ಪ್ರಶ್ನಪತ್ರಿಕೆ ರಚಿಸುವಾಗ ಅನುಸರಿಸಬೇಕಾದ ಅಂಶಗಳು**

(1) ನೂರು ಅಂಕಗಳ ಪತ್ರಿಕೆಯಲ್ಲಿ ಶೇಕಡಾ 50 ಅಂಕಗಳ ಪ್ರಶ್ನೆಗಳು ಸಂಸ್ಕೃತದಲ್ಲಿ ಉತ್ತರಿಸುವ ಪ್ರಶ್ನೆಗಳಾಗಿರಬೇಕು.

(2) ಉಳಿದ ಶೇಕಡಾ 50 ಅಂಕಗಳ ಪ್ರಶ್ನೆಗಳು ಕನ್ನಡ ಅಥವಾ ಆಂಗ್ಲಭಾಷೆಯಲ್ಲಿ ಉತ್ತರಿಸಬಹುದಾದ ಪ್ರಶ್ನೆಗಳಾಗಿರಬೇಕು.

(3) ಪ್ರಶ್ನೆಗಳು ಸ್ಪಷ್ಟವಾಗಿಯೂ, ಎಲ್ಲ ಪಾಠಗಳಿಗೂ ಸಂಬಂಧಪಟ್ಟಂತೆಯೂ ಇರಬೇಕು.

1. ಯಾವುದಾದರೂ **ಆರು** ಪ್ರಶ್ನೆಗಳಿಗೆ ಸಂಸ್ಕೃತದಲ್ಲಿ ಉತ್ತರಿಸಿರಿ.

$6 \times 1 = 6$

ಒಂದು ವಾಕ್ಯದಲ್ಲಿ ಉತ್ತರಿಸುವ ಪ್ರಶ್ನೆಗಳಾಗಿರಬೇಕು.

ಉದಾ: **केन लोकः संरक्ष्यते ?**
**हरिणा लोकः संरक्ष्यते ।**

2. ಯಾವುದಾದರೂ **ಮೂರು** ಪ್ರಶ್ನೆಗಳಿಗೆ ಸಂಸ್ಕೃತದಲ್ಲಿ ಉತ್ತರಿಸಿರಿ.

$3 \times 2 = 6$

ಎರಡು ಅಥವಾ ಮೂರು ವಾಕ್ಯಗಳಲ್ಲಿ ಉತ್ತರಿಸಬಹುದಾದ ಪ್ರಶ್ನೆಗಳು.

ಉದಾ :– **गावः किं किं खादन्ति ?**

**गावः कार्पासबीजानि, पिण्याकं, बुसं, हरितानि तृणानि च खादन्ति। शुष्कतृणमपि खादन्ति।**

3. ಯಾವುದಾದರೂ ಎರಡು ಪ್ರಶ್ನೆಗಳಿಗೆ ಕನ್ನಡದಲ್ಲಿ ಅಥವಾ ಆಂಗ್ಲಭಾಷೆಯಲ್ಲಿ ಉತ್ತರ ಬರೆಯಿರಿ. 2 x 2 = 4

ಇಲ್ಲಿ ಪ್ರಶ್ನೆಗಳು ಕನ್ನಡದಲ್ಲಿ ಇಂಗ್ಲೀಷ್‌ನಲ್ಲಿ ಅಥವಾ ಸಂಸ್ಕೃತದಲ್ಲಿ ಇರಬಹುದು.

ಉತ್ತರ ನಾಲ್ಕೈದು ವಾಕ್ಯಗಳಲ್ಲಿ ಇರಬೇಕು.

ಉದಾ:— **छान्दसाः किमर्थं चिन्ताकुलाः जाताः ?**

ಉತ್ತರ :— ಭೋಜರಾಜನು ಕವಿತ್ವಪ್ರಿಯನೆಂದು ತಿಳಿದ ಕೆಲವು ವೈದಿಕರು ಧಾರಾನಗರಕ್ಕೆ ಬಂದರು. ಒಂದು ಶ್ಲೋಕವನ್ನು ರಚಿಸಿ, ಭೋಜನಿಂದ ಬಹುಮಾನವನ್ನು ಪಡೆಯುವ ಇಚ್ಛೆ ಅವರದಾಗಿತ್ತು. ಕಷ್ಟಪಟ್ಟು ಶ್ಲೋಕದ ಪೂರ್ವಾರ್ಧವನ್ನು ಬರೆದರು. ಎಷ್ಟೇ ಪ್ರಯತ್ನಪಟ್ಟರೂ ಶ್ಲೋಕದ ಉತ್ತರಾರ್ಧವು ಅವರಿಗೆ ಸ್ಫುರಿಸಲಿಲ್ಲ. ಆದ್ದರಿಂದ ವೈದಿಕರು ಬಹಳ ಚಿಂತೆಗೊಳಗಾದರು.

4. 'न स्वभावः परिवर्तते' ಪಾಠದ ಅಥವಾ मारुतेः वाक्कौशलं ಪದ್ಯದ ಕಥೆಯನ್ನು ಸಂಕ್ಷೇಪವಾಗಿ ಬರೆಯಿರಿ. 1 x 4 = 4

ಇಲ್ಲಿ ಉತ್ತರವು ಪೀಠಿಕೆ, ವಿವರಣೆ, ಸಮಾಪ್ತಿ ಹೀಗೆ ಮೂರು ಹಂತದಲ್ಲಿರಬೇಕು. ಸುಮಾರು ಒಂದು ಪುಟದಷ್ಟು ಉತ್ತರವಿರಬೇಕು. ಕನ್ನಡ ಅಥವಾ ಆಂಗ್ಲಭಾಷೆಯಲ್ಲಿರಬೇಕು.

5. ಯಾವುದಾದರೂ **ಮೂರು** ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭದೊಡನೆ ವಿವರಿಸಿ. 3 x 2 = 6

ಪ್ರಶ್ನೆ :— **उभयोः सेनयोः मध्ये मे रथं स्थापय।**

ಇಲ್ಲಿ ಉತ್ತರ ನಾಲ್ಕು ಅಂಶಗಳಿಂದ ಇರಬೇಕು.

(1) ಯಾವ ಪಾಠದಿಂದ ಆರಿಸಿದೆ ? (ಪಾಠದ ಹೆಸರು)

(2) ಯಾರು ಯಾರಿಗೆ ಹೇಳಿದರು ?

(3) ಯಾವಾಗ (ಸಂದರ್ಭ) ? (2–3 ವಾಕ್ಯಗಳಲ್ಲಿ)

(4) ವಾಕ್ಯದ ಅರ್ಥ

6. ಯಾವುದಾದರೂ **ಒಂದು** ಶ್ಲೋಕಕ್ಕೆ ಅನ್ವಯಾನುಸಾರ ಅರ್ಥ ಬರೆಯಿರಿ. 1 x 4 = 4

ಇಲ್ಲಿ ಪಾಠಗಳ ಮಧ್ಯದಲ್ಲಿರುವ ಅಥವಾ ಪದ್ಯಭಾಗದ ಶ್ಲೋಕಗಳನ್ನು ಕೇಳಬಹುದು.

ಉತ್ತರ–ಪದಪದಾರ್ಥ ಕ್ರಮದಲ್ಲಿ ಅಥವಾ 'ಅನ್ವಯಕ್ರಮ ಮತ್ತು ಅರ್ಥ' ಈ ಕ್ರಮದಲ್ಲಾದರೂ ಇರಬಹುದು.

7. ಯಾವುದಾದರೂ **ಎರಡು** ಶ್ಲೋಕಗಳನ್ನು ಪೂರ್ತಿಮಾಡಿ ಅರ್ಥವನ್ನು ವಿವರಿಸಿರಿ. 2 x 4 = 8

ಇಲ್ಲಿ ಕಂಠಪಾಠಕ್ಕೆ ನಿಗದಿಪಡಿಸಿದ ಪದ್ಯದಲ್ಲಿರುವ ಶ್ಲೋಕಗಳನ್ನೇ ಕೇಳಬೇಕು.

ಶ್ಲೋಕ ಪೂರ್ತಿಗೊಳಿಸುವುದಕ್ಕೆ ಎರಡು ಅಂಕಗಳು, ತಾತ್ಪರ್ಯ ಬರೆದರೆ ಎರಡು ಅಂಕಗಳು

8. ಯಾವುದಾದರೂ **ಎರಡು** ಲೋಕೋಕ್ತಿಗಳನ್ನು ಪೂರ್ತಿಗೊಳಿಸಿ ಅರ್ಥವನ್ನು ವಿವರಿಸಿರಿ. 2 x 3 = 6

ಲೋಕೋಕ್ತಿಗಳನ್ನು ಪೂರ್ಣಗೊಳಿಸಲು ಒಂದು ಅಂಕ ; ಅರ್ಥವನ್ನು ಕನ್ನಡ ಅಥವಾ ಇಂಗ್ಲೀಷಿನಲ್ಲಿ ವಿವರಿಸಿದರೆ ಎರಡು ಅಂಕಗಳು

9. ಬಿಟ್ಟ ಸ್ಥಳಗಳನ್ನು ಸಂಸ್ಕೃತ ಪದಗಳಿಂದ ತುಂಬಿರಿ. 3 x 1 = 3

ಉತ್ತರ ಪೂರ್ಣವಾಕ್ಯದಲ್ಲಿದ್ದು ತುಂಬಿದ ಪದದ ಕೆಳಗೆ ಗೆರೆಯೆಳೆಯಬೇಕು.

ಉದಾ:— ....... वाल्मीकये ।

नमः वाल्मीकये ।

10. ಕೆಳಗಿನ ಗದ್ಯಭಾಗಕ್ಕೆ ಅರ್ಥವನ್ನು ಕನ್ನಡ ಅಥವಾ ಇಂಗ್ಲೀಷ್ ನಲ್ಲಿ ಬರೆಯಿರಿ. 1 x 5 = 5

ಗದ್ಯಭಾಗದಿಂದ ಪ್ರಶ್ನೆಕೇಳಬೇಕು. ಸುಮಾರು ಐದು ವಾಕ್ಯಗಳಿರಬೇಕು.

ಉತ್ತರ — ಪ್ರತಿವಾಕ್ಯಕ್ಕೂ ಅರ್ಥ ಸ್ಪಷ್ಟವಾಗಿರಬೇಕು.

11. "बहुधान्यः" ಸಂವತ್ಸರದಿಂದ 10 ಸಂವತ್ಸರಗಳ ಹೆಸರುಗಳನ್ನು ದೇವನಾಗರೀ ಲಿಪಿಯಲ್ಲಿ ಬರೆಯಿರಿ (ಕ್ರಮವಾಗಿ) 5

ಉತ್ತರಿಸುವಾಗ ಹೆಸರುಗಳನ್ನು ಬಿಡಿಸಿ ಕ್ರಮವಾಗಿ ಬರೆಯಬೇಕು.

12. 'पितृ' ಅಥವಾ 'धेनु' ಶಬ್ದದ ಎಲ್ಲಾ ರೂಪಗಳನ್ನು ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯಿರಿ 1 x 3 = 3

ಪಾಠ್ಯಪುಸ್ತಕದ ಕೊನೆಯಲ್ಲಿರುವ ಶಬ್ದಗಳನ್ನು ಕೇಳಬೇಕು.

ಉತ್ತರ ಸ್ಪಷ್ಟವಾಗಿರಬೇಕು. ಎಲ್ಲ ರೂಪಗಳನ್ನು ಎಲ್ಲ ವಿಭಕ್ತಿಗಳಲ್ಲಿಯೂ ಬರೆಯಬೇಕು.

13. ಯಾವುದಾದರೂ ಒಂದು ಕ್ರಿಯಾಪದವನ್ನು ಎಲ್ಲ ಪುರುಷ ವಚನಗಳಲ್ಲಿಯೂ ಬರೆಯಿರಿ. 1 x 3 = 3

ಪಾಠ್ಯಪುಸ್ತಕದಲ್ಲಿರುವ ಕ್ರಿಯಾಪದಗಳನ್ನು ಕೇಳಬೇಕು

ಉತ್ತರ–ಆಯಾ ಲಕಾರದಲ್ಲಿ 9 ರೂಪಗಳನ್ನು ಸ್ಪಷ್ಟವಾಗಿ ಬರೆಯಬೇಕು.

14. ಗುಂಪಿಗೆ ಸೇರದ (ವಿಜಾತೀಯ) ಪದಗಳನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ. 3 x 1 = 3

ಗದ್ಯ ಅಥವಾ ಪದ್ಯ ಮತ್ತು ವ್ಯಾಕರಣ ವಿಷಯಗಳಿಗೆ ಸಂಬಂಧಿಸಿದ ಪ್ರಶ್ನೆಗಳಿರಬೇಕು.

ಉದಾ:— हरिः, पतिः, मतिः, मुनिः ।

ಉತ್ತರ :— मतिः

15. ವಿರುದ್ಧಾರ್ಥಕ ಪದಗಳನ್ನು ಬರೆಯಿರಿ. **(ಮೂರಕ್ಕೆ)** 3 x 1 = 3

ಇಲ್ಲಿ ಪಾಠದ ಕೊನೆಯಲ್ಲಿರುವ 'ಅಭ್ಯಾಸ'ದಲ್ಲಿರುವ ಅಥವಾ ಪಾಠದ ಮಧ್ಯದಲ್ಲಿರುವ ಪ್ರಸಿದ್ಧ ಪದಗಳನ್ನು ಕೇಳಬಹುದು

ಉತ್ತರ ಸ್ಪಷ್ಟವಾಗಿ ಸಂಸ್ಕೃತದಲ್ಲಿಬೇಕು.

ಉದಾ :— **प्रातः**

ಉತ್ತರ – **प्रातः X सायम्**

16. ಸಮಾನಾರ್ಥಕ ಪದಗಳನ್ನು ಬರೆಯಿರಿ. **(ಮೂರಕ್ಕೆ)** 3 x 1 = 3

ಪಾಠಗಳ ಕೊನೆಯಲ್ಲಿ ಅಭ್ಯಾಸದಲ್ಲಿರುವ ಅಥವಾ ಪಾಠಗಳ ಮಧ್ಯ ದಲ್ಲಿರುವ ಪ್ರಸಿದ್ಧ ಶಬ್ದಗಳನ್ನು ಕೇಳಬಹುದು.

ಉತ್ತರ ಒಂದು ಪದವಿದ್ದರೆ ಸಾಕು

ಉದಾ :— **पुत्रः**

ಉತ್ತರ :— **पुत्रः = सुतः ।**

17. ಸಂಧಿ ಬಿಡಿಸಿ ಹೆಸರಿಸಿರಿ. **(ಮೂರಕ್ಕೆ)** 3 x 1 = 3

ವ್ಯಾಕರಣ ವಿಭಾಗದಲ್ಲಿರುವ ಸಂಧಿ ಪ್ರಕರಣದಿಂದ ಅಥವಾ ಪಾಠಗಳ ಕೊನೆಯಲ್ಲಿರುವ ಅಭ್ಯಾಸಗಳಿಂದ ಪ್ರಶ್ನೆ ಕೇಳಬಹುದು.

ಸಂಧಿ ಬಿಡಿಸಿ ಬರೆದು ನಂತರ ಸಂಧಿಯ ಹೆಸರನ್ನು ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯಬೇಕು.

ಉದಾಃ— ಪ್ರಶ್ನೆ — **प्रयच्छतीति**

ಉತ್ತರ :— **प्रयच्छति + इति = सवर्ण दीर्घ सन्धिः**

18. ಕೆಳಗಿನವುಗಳಲ್ಲಿ ಯಾವುದಾದರೂ **ಮೂರು** ಪದಗಳನ್ನು ಸಂಸ್ಕೃತ ವಾಕ್ಯದಲ್ಲಿ ಉಪಯೋಗಿಸಿರಿ. 3 x 1 = 3

ಪಾಠ ಮತ್ತು ಪದ್ಯಗಳ ಕೊನೆಗೆ ಅಭ್ಯಾಸದಲ್ಲಿರುವ ಪದಗಳನ್ನು ಕೇಳಬೇಕು.

ಉತ್ತರ ಪೂರ್ಣವಾಕ್ಯದಲ್ಲಿರಬೇಕು. ಶುದ್ಧವಾಗಿರಬೇಕು.

ಉದಾ :— **मन्दिरम्**

ಉತ್ತರ:— **मम गृहस्य समीपे शिवस्य मन्दिरं अस्ति ।**

19. ಯಾವುದಾದರೂ **ಮೂರು** ಶಬ್ದಗಳ ಅಂತ, ಲಿಂಗ, ವಿಭಕ್ತಿ, ವಚನಗಳನ್ನು ತಿಳಿಸಿರಿ. 3 x 1 = 3

ಪಾಠದ ಕೊನೆಯಲ್ಲಿರುವ ಅಭ್ಯಾಸದಲ್ಲಿರುವ ಅಥವಾ **'शब्दरूपाणि'** ಪ್ರಕರಣದಲ್ಲಿರುವ ಶಬ್ದಗಳನ್ನು ಕೇಳಬೇಕು.

ಉತ್ತರವನ್ನು ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯಬೇಕು. ಅಂತ, ಲಿಂಗ, ವಿಭಕ್ತಿ, ವಚನ ಈ ನಾಲ್ಕು ಅಂಶಗಳನ್ನು ಬರೆಯಬೇಕು.

ಉದಾ :— **नेत्रे**

ಉತ್ತರ :– **'अ'कारान्तः, नपुंसकलिङ्गः, प्रथमा विभक्तिः, द्विवचनम् ।**

20. ಇವುಗಳನ್ನು ಪ್ರಶ್ನೆವಾಕ್ಯಗಳನ್ನಾಗಿ ಬದಲಾಯಿಸಿರಿ. **(ಮೂರಕ್ಕೆ)** 3 x 1 = 3

ಪಾಠದ ಕೊನೆಯಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಪ್ರಶ್ನೆಗಳನ್ನಾಗಲೀ ಅಥವಾ ಸ್ವಂತ (ಸರಳ) ವಾಕ್ಯವನ್ನಾಗಲೀ ಕೇಳಬಹುದು.

ಉದಾ :— **रामः पद्यं पठति ।**

**रामः किं पठति ?** ಅಥವಾ

**कः पद्यं पठति ?**

**ಅಥವಾ**

ಈ ವಾಕ್ಯಗಳಲ್ಲಿರುವ ದೋಷಗಳನ್ನು ಪರಿಹರಿಸಿರಿ. 3 x 1 = 3

ಇಲ್ಲಿ ವ್ಯಾಕರಣರೀತ್ಯಾ ದೋಷವಿರುವ ಮೂರು ವಾಕ್ಯಗಳನ್ನು ಕೇಳಬೇಕು. ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಪೂರ್ಣವಾಕ್ಯದಲ್ಲಿ ಬರೆಯಬೇಕು.

ಉದಾ :— अहं तं पुरुषं पश्यसि।

ಉತ್ತರ :— अहं तं पुरुषं पश्यामि।

ಅಥವಾ

त्वं तं पुरुषं पश्यसि।

21. "यण्सन्धिः' ಅಥವಾ 'पूर्वरूपसन्धिः' ಯನ್ನು ಉದಾಹರಣೆಯೊಂದಿಗೆ ವಿವರಿಸಿರಿ. 1 x 3 = 3

ಪಾಠ್ಯಪುಸ್ತಕದ ವ್ಯಾಕರಣ ವಿಭಾಗದಲ್ಲಿ ವಿವರಿಸಿಲಾಗಿರುವ ಸಂಧಿಗಳನ್ನು ಕೇಳಬೇಕು. ಅಥವಾ **प्रथमा** ಪರೀಕ್ಷೆಗೆ ನಿಗದಿಪಡಿಸಿದ ಪುಸ್ತಕದಿಂದಲೂ ಕೇಳಬಹುದು.

ಉತ್ತರ ಎರಡು ಹಂತದಲ್ಲಿರಬೇಕು.

(1) ಸಂಧಿಯ ನಿಯಮ (ಕನ್ನಡ ಅಥವಾ ಇಂಗ್ಲೀಷ್ ನಲ್ಲಿ)

(2) ಉದಾಹರಣೆಗಳು (ಸಂಸ್ಕೃತದಲ್ಲಿ)

22. ಯಾವುದಾದರೂ **ಒಂದಕ್ಕೆ** ಟಿಪ್ಪಣಿಯನ್ನು ಮಾತೃಭಾಷೆಯಲ್ಲಿ ಬರೆಯಿರಿ. 1 x 3 = 3

ಇಲ್ಲಿ ವ್ಯಾಕರಣ ವಿಭಾಗದಲ್ಲಿರುವ ಯಾವುದಾದರೂ ವಿಷಯವನ್ನು ಕೇಳಬಹುದು.

ಉತ್ತರ — 4–5 ವಾಕ್ಯಗಳಲ್ಲಿ ಸ್ಪಷ್ಟವಾಗಿರಬೇಕು. ಉದಾಹರಣೆಯನ್ನು ಬರೆಯಬೇಕು.

ಉದಾ:– ಪ್ರಶ್ನೆ— (1) 'तुमुन्' प्रत्ययान्तम्
(2) अव्ययम्
(3) उपसर्गः ಇತ್ಯಾದಿ

**ಅಥವಾ**

ಯಾವುದಾದರೂ **ಎರಡರ** 'ವ್ಯಾಕರಣ ವಿಶೇಷ' ವನ್ನು ತಿಳಿಸಿರಿ. 2 x 1 = 2

ಇದರಲ್ಲಿ ಪಾಠಗಳ ಕೊನೆಯ ಅಭ್ಯಾಸದಲ್ಲಿ ವ್ಯಾಕರಣ ವಿಶೇಷಕ್ಕೆ ಕೇಳಿದ ಪ್ರಶ್ನೆಗಳನ್ನು ಕೇಳಬೇಕು.

ಉದಾ :— ಪ್ರಶ್ನೆ — **अर्जुनं विना ।**

23. ಕೆಳಗಿನ ವಾಕ್ಯಗಳನ್ನು ಮಾತೃಭಾಷೆಗೆ ಅನುವಾದಿಸಿರಿ. 5 x 1 = 5

ಇಲ್ಲಿ ಐದು ವಾಕ್ಯಗಳನ್ನು ಕೇಳಬೇಕು. ವಾಕ್ಯಗಳು ಪಾಠದಲ್ಲಿ ಇರುಪವುಗಳು ಅಥವಾ ಸ್ವಂತದ್ದು.

ಉತ್ತರ ಪೂರ್ಣವಾಕ್ಯದಲ್ಲಿರಬೇಕು. ಇಂಗ್ಲೀಷ್ ಅಥವಾ ಕನ್ನಡದಲ್ಲಿರ ಬೇಕು.

ಉದಾ — ಪ್ರಶ್ನೆ — **सः प्रतिदिनं देवं नमति ।**

ಉತ್ತರ — ಅವನು ಪ್ರತಿದಿನವೂ ದೇವನನ್ನು ನಮಸ್ಕರಿಸುತ್ತಾನೆ.

24. ಈ ವಾಕ್ಯಗಳನ್ನು ಸಂಸ್ಕೃತಭಾಷೆಗೆ ಅನುವಾದಿಸಿರಿ. 5 x 1 = 5

ಇಲ್ಲಿ ಐದು ವಾಕ್ಯಗಳನ್ನು ಕೇಳಬೇಕು. ವಾಕ್ಯಗಳು ಸ್ವಂತದ್ದಾಗಿದ್ದು ಸರಳವಾಗಿರಬೇಕು.

ಉತ್ತರ ಸಂಸ್ಕೃತ ಲಿಪಿಯಲ್ಲಿ ಸಂಸ್ಕೃತ ಭಾಷೆಯಲ್ಲಿರಬೇಕು. ಪೂರ್ಣವಾಕ್ಯದಲ್ಲಿರಬೇಕು.

ಉದಾ :— ಪ್ರಶ್ನೆ — ನಾನು ನನ್ನ ಮಿತ್ರನ ಜೊತೆಗೆ ಆಡುತ್ತೇನೆ.

ಉತ್ತರ :— **अहं मम मित्रेण सह क्रीडामि ।**

---

यावदस्ति त्रयी लोके
चतुर्मुख-मुखोद्भवा ।
यावद्वा रामचरितं
वाल्मीकिकविचित्रितम् ॥

क्षरन्त्यमृतधारा वा
यावद्व्यासस्य सूक्तयः ।
वाग्देव्या वरपुत्रस्य
कालिदासस्य वा गिरः ॥

तावदेषा देवभाषा
देवी स्थास्यति भूतले ।
यावच्च वंशोऽस्त्यार्याणां
तावदेषा ध्रुवं ध्रुवा ॥

पुरे ग्रामे गृहे कुड्यां
बालो वृद्धो युवापि च ।
करोतु संस्कृताभ्यासं
प्राप्नोतु सुखसम्पदम् ॥

---

ಈ ಪುಸ್ತಕವು ದೊರೆಯುವ ಸ್ಥಳ :

ಶ್ರೀ ಸುರಸರಸ್ವತೀ ಸಭಾ
ಶ್ರೀ ಶಂಕರಮಠದ ಆವರಣ, ಶಂಕರಮಠ ರಸ್ತೆ,
ಶಂಕರಪುರಂ, ಬೆಂಗಳೂರು-560 004

---

ಪ್ರಭಾ ಮುದ್ರಣಾಲಯ, ಬಸವನಗುಡಿ, ಬೆಂಗಳೂರು-560 004